क्र० - 77

परि० सं० - 1999

तन्त्रसार

तन्त्र

25 - पूर्ण

॥शाके १७२४॥ अथतंत्रसारप्रारंभणियम्॥ शुभंभूयात्॥

श्रीगणेशाय नमः ॥ ॥ नत्वा कृष्णपदद्वंद्वं ब्रह्मादिसुरवंदितं गुरुं चैव ज्ञानदातारं कृष्णानंदेन धीमता तंत्रकृत्यागमाद्युक्तान्नाना
र्थप्रतिपद्य च लोकस्यार्थं च संक्षेपात्तंत्रसारः प्रतन्यते उच्यते प्रथमं तत्र लक्षणं गुरुशिष्ययोः शांतो दांतः कुलीनश्च विनीतः
शुद्धवेशवान् शुद्धाचारः सुप्रतिष्ठः शुचिर्दक्षः सुबुद्धिमान् आश्रमी ध्याननिष्ठश्च मंत्रतंत्रविशारदः निग्रहानुग्रहे शक्तो
गुरुरित्यभिधीयते अथ शिष्यलक्षणं शांतो विनीतः शुद्धात्मा श्रद्धावान् धारणक्षमः समर्थश्च कुलीनश्च दांतः सच्चरितो
व्रती ॥ एवमादिगुणैर्युक्तः शिष्यो भवति नान्यथा ॥ गुरुता शिष्यता वापि तयोर्वत्सरवासतः तथा चोक्तं सारसंग्रहे सद्गुरुः
स्वाश्रितं शिष्यं वर्षमेकं परीक्षयेत् स्वप्ने तु न कालनियमः स्वप्ने तु नियमो नहीति नारदवचनात् ॥ तंत्रे च ॥ राज्ञि चामात्यजो दोषः
पत्नीपापं स्वभर्त्तरि तथा शिष्यार्जितं पापं गुरुः प्राप्नोति निश्चितं ॥ ज्ञानार्णवे ॥ गुरौ मनुष्यबुद्धिं तु मंत्रे चाक्षरभावनां प्रतिमा राम
सु शिलाबुद्धिं कुर्वाणो नरकं व्रजेत् ॥ जन्महेतू हि पितरौ पूजनीयौ प्रयत्नतः गुरुर्विशेषतः पूज्यो धर्माधर्मप्रदर्शकः गुरुः पिता १
गुरुर्माता गुरुर्देवो गुरुर्गतिः ॥ शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन गुरोर्हितं प्रकर्तव्यं वाङ्मनःकायकर्मभिः अहिताचरणाद्दे

विविष्ठायां जायते कृतिः मंत्रत्यागाद्भवेन्मृत्युर्गुरुत्यागाद्दरिद्रता गुरुमंत्रपरित्यागाद्रौरवं नरकं व्रजेत् गुरौ सन्निहिते यस्तु
पूजयेदन्यदेवतां ॥ प्रयाति नरकं घोरं सा पूजा विफला भवेत् ॥ श्रीक्रमे ॥ उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता तस्मा
न्मन्येत सततं पितुरप्यधिकं गुरुं गुरुवद्गुरुपुत्रेषु गुरुवत्तत्सुतादिषु कल्पद्रुमे ॥ अविद्यो वा सविद्यो वा गुरुरेव तु दैवतं अ
मार्गस्थोपि मार्गस्थो गुरुरेव सदा गतिः आयांतमग्रतो गच्छेद्गच्छंतं तमनुव्रजेत् आसने शयने वापि न तिष्ठेदग्रतो गुरोः
अनुज्ञां प्राप्य तिष्ठेच्चेन्नेवं शापमवाप्नुयात् तथा क्रियासारे गुर्माता पिता स्वामी बांधवाः सुहृदः शिवः इत्याध्यायमनो
नित्यं भजेत्सर्वात्मना गुरुं वर्षेकेन भवेद्योग्यो विप्रो गुणसमन्वितः वर्षद्वयेन राजन्यो वैश्यस्तु वत्सरैस्त्रिभिः चतुर्भिर्व
त्सरैः शूद्रः कथिता शिष्ययोग्यता तारप्रदीपे आगमे मोक्षविधानेन कलौ देवान्यजेत्सुधीः नहि देवाः प्रसीदंति क
लौ चान्यविधानतः मंत्राणां देवता ज्ञेया देवता गुरुरूपिणी तेषां भिधानं कर्तव्यं यदीच्छेच्छुभमात्मनः दिव्यागमे शिव
वाक्यं गुरुशय्यासनं यानं पादुकोपानपीठकं स्नानोदकं तथा छायां लंघयेन्न कदाचन गुरोरग्रे पृथक्पूजामौद्धत्यं च परि

त्यजेत्॥ दीक्षाव्याख्याप्रभुत्वादीगुरोरग्रे परित्यजेत्॥ इति शिष्यलक्षणं॥ योगिनीतंत्रे॥ पितुर्मंत्रं न गृह्णीयात्तथा मातामह-
२ स्य च सोदरस्य कनिष्ठस्य वैरिपक्षाश्रितस्य च तथा रुद्रयामले न पत्नीं दीक्षयेद्भर्त्ता न पिता दीक्षयेत्सुतां न पुत्रं च तथा भ्राता
भ्रातरं न च दीक्षयेत्॥ सिद्धमंत्रो यदि पतिस्तदा पत्नीं स दीक्षयेत्॥ शक्तित्वेन वरारोहे न च सा कन्यका भवेत् तथा गणेशवि-
मर्षिण्यां यतेर्दीक्षा पितुर्दीक्षा दीक्षा च वनवासिनः विविक्ताश्रमिणो दीक्षा न सा कल्याणदायिका इत्यादिनिषेधवच-
नादेभ्यो दीक्षां न गृह्णीयादित्यर्थः इदं तु सिद्धेतरविषयं सिद्धमंत्रे न दुष्यतीति वचनात् तथा च सिद्धयामले यदि भाग्य-
वशेनैव सिद्धविद्यां लभेत् प्रिये तदैव तां सुदीक्षेत त्यक्त्वा गुरुविचारणां प्रमादाच्च न तथाज्ञानात् पितुर्दीक्षां समाचरेत् प्रा- राम
यश्चित्तं ततः कृत्वा पुनर्दीक्षां समाचरेत् पितुरित्युपलक्षणं मातामहादीनामपि प्रायश्चित्तं त्वयुतं सावित्रीजापः सर्वत्र द- २
र्शनात् मत्स्यसूक्ते निर्वीर्यं तु पितुर्मंत्रं शैवे शाक्ते न दुष्यतीति लौकिकमंत्रदीक्षापरं योगिनीतंत्रे शक्त्यादिविद्याम-
धिकृत्य दीक्षानिषेधात् यद्वा शाक्तविद्यायां॰ मत्स्यसूक्ते तथा प्रतिपादनात् तथा च निजकुलतिलकाय ज्येष्ठपुत्राय दद्या-

दित्यादि महातीर्थे उपरागे सति सर्वत्र न दोषः तथा विष्णुमंत्रमधिकृत्य साधुपृष्टं त्वया ब्रह्मन् वक्ष्यामि सकलं तव ब्रह्म-
णा कथितं पूर्वं वशिष्ठाय महात्मने वशिष्ठोपि स्वपुत्राय मन्त्रिने दत्तवान्स्वयं प्रसन्नहृदयः स्वच्छः पितामहः करुणानिधिः
कुरुक्षेत्रे महातीर्थे सूर्यग्रासे सर्वाणि दत्तवान्॥ इत्यादि वैशंपायनसंहितायां शौनकं प्रति व्यासवाक्यं योगिनीतंत्रे॥ निर्वीर्यं धा
च पितुर्मंत्रं तथा मातामहस्य च॥ स्वप्नलब्धे स्त्रियादत्ते संस्कारेणैव शुध्यति यत्तु साध्वी चैव सदाचारा गुरुभक्ता जिते-
न्द्रिया सर्वमंत्रार्थतत्त्वज्ञा सुशीला पूजने रता गुरुयोग्या भवेत्सा हि विधवा परिवर्जिता स्त्रियो दीक्षा शुभा प्रोक्ता मा-
तुश्चाष्टगुणा स्मृता इदं तु गुरोरुपासितमंत्रपरं तथा च भैरवीतंत्रे स्वीयविद्याप्रदाने तु न कुर्याद्गुरुचिंतनं मातुरित्युपासि-
तेऽष्टगुणं अनुपासिते शुभफलदमित्यर्थः सिद्धमंत्रविषयत्वात् इति केचित् वस्तुतस्तु योगिनीतंत्रे स्त्रीपदं विधवाप-
रं एकवाक्यताबलात् स्वप्नलब्धे तु कलशे गुरोः प्राणान्निवेशयेत्॥ वटपत्रे कुंकुमेन लिखित्वा ग्रहणं शुभं ततः शुद्धिम-
वाप्नोति अन्यथा विफलं भवेत्॥ इदं तु सद्गुरोरभावे तत्सत्त्वे तस्मादेव मंत्रं गृह्णीयात्॥ स्वप्ने तु नियमो नहीति नारदवचनात्

२ दीक्षां विना जपस्य दुष्टत्वात् प्रथमं सा निरूप्यते दिव्यं ज्ञानं यतो दद्यात् कुर्यात् पापस्य संक्षयं तस्माद्दीक्षेति सा प्रोक्ता मुनिभि
स्तत्त्ववेदिभिः सर्वागमेषु दीक्षाया आवश्यकत्वात् तथा च दीक्षामूलं जपं सर्वं दीक्षामूलं परं तपः दीक्षामाश्रित्य निव
सेत्र कुत्राश्रमे वसन् अदीक्षिता ये कुर्वन्ति जपपूजादिकाः क्रियाः न भवन्ति प्रिये तेषां शिलायामुप्तबीजवत् देवि दीक्षा
विहीनस्य न सिद्धिर्न च सद्गतिः तस्मात्सर्वप्रयत्नेन गुरुणा दीक्षितो भवेत् अदीक्षितोपि मरणे रौरवं नरकं व्रजेत् ॥ त
स्माद्दीक्षां प्रयत्नेन सदा कुर्वीत तान्त्रिकीं कल्पदृष्टा तु मंत्रमेवैषा शूद्धानिनराधिमः मन्वन्तरसहस्रेषु निष्कृतिर्नैव जाय
ते नादीक्षितस्य कार्यं स्यात् तपोभिर्नियमव्रतैः न तीर्थगमनेनापि न च शारीरयंत्रयोः अतः सद्गुरोराहितदीक्षः स
र्वकर्माणि साधयेत् ॥ न चाप्यनुकूलं मंत्रं दीक्षेत तथा च स्वनामराशिकोष्ठानामनुकूलान् भजन् मनून् इति वचनात् त राम
च्चक्रविचारस्यावश्यकत्वात् प्रथमं तन्निरूप्यते तत्र च नृसिंहार्कवराहाणां प्रासादप्रणवस्य च सपिण्डाक्षरमंत्राणां सि ३
द्धादीन्नैव शोधयेत् वाराहीतंत्रे ॥ तारचक्रं राशिचक्रं नामचक्रं तथैव च अत्र चेत् सगुणो मंत्रो नान्यत् चक्रं विचारयेत् इ

ति तु प्रधानतया बोद्धव्यम् तथा च धनिमंत्रं न गृह्णीयादनुकूलं च न तथैव च इत्यादिदर्शनात् स्वप्नलब्धे स्त्रिया दत्ते मालामं
त्रे च त्र्यक्षरे वैदिके बुध मंत्रेषु सिद्धादीन्नैव शोधयेत् वाराहीतंत्रे ॥ मालामंत्रस्तु वारीरूपे विंशत्यष्टाधिका मंत्राः प्रकी
र्तिताः नपुंसकस्य मंत्रस्य सिद्धादीन्नैव शोधयेत् ॥ हंसस्याष्टाक्षरस्यापि तथा पंचाक्षरस्य च एकद्वित्र्यादिबीजस्य
सिद्धादीन्नैव शोधयेत् ॥ एकाक्षरस्य मंत्रस्य मालामंत्रस्य पार्वती वैदिकस्य च मंत्रस्य सिद्धादीन्नैव शोधयेत् तथा च
मुण्डमालातंत्रे ॥ काली तारा महाविद्या षोडशी भुवनेश्वरी भैरवी छिन्नमस्ता च विद्या धूमावती तथा बगला सिद्धवि
द्या च मातंगी कमलात्मिका एता दश महादेवि महाविद्याः प्रकीर्तिताः नात्र सिद्धाद्यपेक्षास्ति नक्षत्रादिविचारणा ॥
कालादिशोधनं नास्ति न च मित्रादिदूषणं ॥ सिद्धविद्यातया नात्र युगसेवापरिश्रमः इत्यादिवचनादेषु मंत्रेषु विचारो ना
स्ति वस्तुतः इदं प्रशंसापरं सर्वत्र विचारस्यावश्यकत्वम् दुरदृष्टवशात् कदाचिदेर मंत्रस्य स्वप्नादौ प्राप्तात् तद्दोषस्य द
ष्टत्वादिति तु सांप्रदायिकाः तत्र च कुलाकुलस्य भेदं हि वक्ष्यामि मंत्रिणामिह ॥ निवं धवाद्यग्निभूजलाकाशाः पंचाश

४

ल्पिपयः क्रमात्॥ पंचह्रस्वाः पंचदीर्घा विंदुंताः संधिसंभवाः पंचशः कादयः षक्षन्तमहाप्रकीर्तिताः तथा च अ आ ए क च त प।
य षा मारुताः इ ई ऐ ख छ ठ थ फ र क्षा आग्नेयाः उ ऊ अ ग ज ड द ब लाः पार्थिवाः ऋ ॠ ओ घ झ ढ ध भ व सा वारुणाः ऌ ॡ अं।
ङ ञ ण म य्य हा नाभसाः साधकस्याक्षरं पूर्वं मंत्रस्यापि तथाक्षरं यद्येकभूतदैवत्यं तां विज्ञेयं स्वकुलं हितं भौमस्य वारुणं मि
त्रं आग्नेयस्यापि मानेरुं मारुतं पार्थिवानां च आग्नेयस्यां भसं रिपुः चकारादाग्नेयं पार्थिवानां शत्रुः नाभसं सर्वमित्रं स्या
द्विरुद्धं नैव शीलयेत् तथा च रुद्रयामले॥ पार्थिवे वारुणं मित्रं तैजसं शत्रुरीरितं इत्यादि इति कुलाकुलचक्रविचारः॥
अथ राशिचक्रं॥ यथा आगमकल्पद्रुमे सूत्रद्वयं पूर्वपरायतं स्यात्तन्मध्यतो याम्यकुवेरभेदात्॥ एकैकमीशाननिशाचरे तु
हुताशवाय्वोर्विलिखेन्नतोऽर्णान्॥ वेदाग्निवह्नियुगलश्रवणाक्षिसंख्यान् पंचेषुवाणशरपंचचतुष्टयार्णान् मेषादितः
प्रविलिखेत् सकलांस्तद्वर्णान् कन्यागतान्दान्प्रविलिखेदथ शादिवर्णान् तेन अ आ इ ई मेषः उ ऊ ऋ वृषः ऋ ॠ ऌ ॡ मिथुनं
ए ऐ कर्कटः ओ औ सिंहः अं अः श ष स हाः कन्या कवर्गस्तुला चवर्गो वृश्चिकः टवर्गो धनुः तवर्गो मकरः पवर्गः कुंभः यवर्गो मीनः

राम
४

स्वराशीनामनुकूलं मंत्रं भजेत् स्वताररराशिकोष्ठानामनुकूलान् वृश्चिकः टवर्गो धनुः तवर्गो मकरोजेन्मनूनिति वचनात् रा
शीनां शुभदानश्रयात्यजे छत्रुं मृतिं मृतिं व्ययं॥ स्वराशेर्मंत्रराश्यंतं गणनीयं विचक्षणैः यदा तु स्वराशेरज्ञानं तदा साधकना
माद्यक्षरसंवंधिनं राशीं गृहीत्वा गणयेत् साध्याद्यक्षरराश्यंतं गणयेत्साधकाक्षरादिति रामार्चनचंद्रिकाधृतवचनात्
अज्ञाने राशिनक्षत्रे स्वनामाद्यक्षरादित इति वचनाच्च तंत्रराजे तेन मंत्राद्यवर्णेन नाम्नश्चाद्याक्षरेण च गणयेद्यदि
षष्ठश्चाप्यष्टमं द्वादशं तथा रिपुर्मंत्राद्यवर्णस्यात्तेन नस्याहितं भवेत् एकपंचनववांधवाः स्मृता द्वौ च षट्दशमासु
सेवकाः वह्निरुद्रमुनयस्तु पोषका द्वादशाष्टचतुरस्तु घातकाः॥ इति विशेषविषयं॥ रामार्चनचंद्रिकाधृतत्वात् शत्रुया
दौ तु षष्ठं वर्जनीयं षष्ठाष्टमद्वादशानि वर्जनीयानि नियत्नत इति वचनात्॥ तंत्रराजस्वरसाच्च अथवा लग्नाधनभ्रा
तृवंधुपुत्रशत्रुकलत्रकाः मरणं धर्मकर्मायव्यया द्वादशराशयः नामानुरूपमेतेषां शुभाशुभफलं दिशेत् शत्रुस्थाने
वंधुरिति पाठः वंधुस्थाने शत्रुः अथ नक्षत्रचक्रं॥ अ आ अश्विनी देवः इ भरणी मानुषः ई उ ऊ कृत्तिका राक्षसः ऋ ॠ ऌ ॡ

५

रोहिणीमानुषः ४मृगशिरोदेवः ५आर्द्रामानुषः ६ओपुनर्वसुर्देवः ७पुष्योदेवः ८अश्लेषाराक्षसः ९मघाराक्षसः
चपूर्वफल्गुनीनरः ११उत्तरफल्गुनीमानुषः १२हस्तादेवः १३चित्राराक्षसः १४स्वातीदेवः १५पुष्योदेवः १६अश्लेषाराक्षसः
विशाखाराक्षसः तथा १७अनुराधादेवः १८ज्येष्ठाराक्षसः १९पूर्वाषाढनरः २०उत्तराषाढानरः २१श्रवणादेवः २२धनिष्ठा
राक्षसः २३शतभिषारक्षः २४पूर्वभाद्रपदामानुषः २५उत्तरभाद्रपदामानुषः २६रेवतीदेवः तथा रुद्रयामले
क्रमे उत्तरादक्षिणाग्रांभुरेखांकुर्यात्ततुष्टयी दशरेखाः पश्चिमाग्राः कर्तव्यावीरवंदित अकारादिक्षकारांतान् द्वि चंद्र
वह्निवेदकान् भूमीदुनेत्रचंद्राश्च अश्लेषांतंप्रयोगे प्रिये द्विभूनेत्रनेत्रयुग्मांश्च नेत्राग्निचन्द्रकान् मघादिज्येष्ठपर्यंतं द्वि
नीयंनवतारकं॥वह्निभू इंदु चंद्रयुग्मे नेत्रवह्निकान् वेदेन भेदितावर्णारेवत्यंशगताः क्रमात्॥वर्णाः क्रमात्स्वरांत्या
तुरवत्यंशगतावुभौ तथाचनिबंधे पूर्वोत्तरात्रयंचैवभरण्यार्द्राचरोहिणी इमानिमानुषाण्याहुर्नक्षत्राणिमनीषिणः
ज्येष्ठाशतभिषामूलाधनिष्ठाश्लेषकृत्तिकाः चित्रामघाविशाखाःस्युस्ताराराक्षसदेवताः अश्विनीरेवतीपुष्यःस्वातीह

राम
५

ग
स्तपुनर्वसुः अनुराधामृगशिरःश्रवणंदेवतारकाः तथा स्वजातौपरमाप्रीतिमध्यमाभिन्नजातिषु रक्षोमानुषयोर्नाशोवैरं
राक्षसदेवयोः जन्मसंपद्विपत्क्षेमः प्रत्यरिसाधकोवधः मित्रंपरममित्रंचजन्मादीनिपुनःपुनः जन्मत्रिपंचसप्ताख्यानिव
र्जनीयानिनक्षत्राणि तथाच रसाष्टनवभद्राणियुगयुग्मगतान्यति इतराणिनभद्राणिनतत्याज्यानिमनीषिभिः इ
त्यादि स्वनक्षत्रादेवनक्षत्रंगणनीयं नक्षत्रविद्यायांनक्षत्रविचारस्यावश्यकत्वं नक्षत्रशुद्धिस्ताराण्यानान्यच्चक्रेवि
चारयेदिति वाराहीतंत्रे॥तदज्ञानेस्वनामाद्यक्षरसंबंधिनक्षत्राद्गणनीयंप्रादक्षिण्येनगणयेत्साधकाद्यक्षरात्क्र
धीः॥इतिवचनात्॥अथाकथहचक्रं॥चतुरस्रेलिखेद्वर्णान्चतुस्कोष्ठसमन्वितेचतुःकोष्ठयुक्तेचतुःकोष्ठषोडशको
ष्ठस्थितियावत्॥तेषुअकारादिवर्णान्प्रादक्षिण्येनलिखेत् यथा इंद्वग्निरुद्रनवनेत्रयुगार्कदिक्षु मत्वष्टषोडशचतुर्दश
भौतिकेषु पातालपंचदशवह्निहिमांशुकोष्ठवर्णान्लिखेच्छिपिभवानक्रमशस्तुधीमान्॥नामाद्यक्षरमारभ्ययाव
न्मंत्रादिमाक्षरं चतुर्भिःकोष्ठैरेकैकमितिकोष्ठचतुष्टयं पुनःकोष्ठगकोष्ठेषुसव्यतोनाम्नआदितः सिद्धःसाध्यःसुसिद्धोऽरिः

क्रमाज्ज्ञेयो विचक्षणैः सव्यतो दक्षिणतः तथा च विश्वसारे दक्षिणावर्त्तयोगेन कोष्ठे वर्णमन्त्रलिखेत्सुधीः येनैव लिखनं
६ कुर्यात्तेनैव गणनं स्मृतं सिद्धः सिध्यति कालेन साध्यस्तु जपहोमतः सुसिद्धो ग्रहणादेव अरिर्मूलं निहंतति सि
द्धार्णा बांधवाः प्रोक्ताः साध्यास्ते सेवकोऽधिकसेवया पुष्णाति पोषकोऽभीष्टघातको नाशयेत् ध्रुवं पुनः कोष्ठकोष्ठे
षु सिद्धादीनां फलमाह सिद्धसिद्धो यथोक्तेन द्विगुणात् सिद्धसाधकः सिद्धासु सिद्धोऽर्द्धजपात् सिद्धारिर्हंति बांधवा।
न् साध्यसिद्धो द्विगुणकः साध्यसाध्यो निरर्थकः तत्सु सिद्धो अर्द्धजपात् साध्यारिर्हंति गोत्रजान् सुसिद्धसिद्धोर्द्ध
जपात्तत्साध्यो द्विगुणाधिकात् तत्सु सिद्धो ग्रहादेव सु सिद्धारिः स्वगोत्रहा अरिसिद्धः सुतान्हन्यात् अरिसाध्य
स्तु कन्यकाः पत्नीमरिसु सिद्धस्तु तदरिर्हंति साधकान् अथाकडमचक्रं ॥ रेखाद्वयं पूर्वपरेण कुर्यात्तन्मध्यतो याम्यकु रम
वेरभेदात् महेश्वरस्याधिपतिक्रमेण तिर्यक्तथा वायुहुताशनेन अकारादिक्षकारांतान् क्लीबहीनान् लिखेत्ततः एके ६
कक्रमतो ख्यातं मेषादिषु घषांतकान् गणयेत्क्रमशो भद्रे नामादिवर्णपूर्वकान् मेषादितश्च मीनांतं गणयेत्क्रमशः सु

धीः जप्तुः स्वनामतो मंत्री यावन्मंत्रादिमाक्षरं सिद्धसाध्यसुसिद्धारीन् पुनः सिद्धादयः पुनः नवैकपंचमे सिद्धः साध्यः षड्दशयुग्म
के सुसिद्धस्त्रिसप्तके रुद्रो वेदाष्टद्वादशे रिपुः एतत्कथितं देवी अकडमादिकमुत्तमं इदं तु गोपालविषये वाराहीतंत्रे ॥ तारशुद्धिर्वै
ष्णवानां कोष्ठशुद्धिः शिवस्य च ॥ राशिशुद्धिस्त्रिपुरायां गोपाले कडमः स्मृतः ॥ कोष्ठशुद्धिर्वाराहे च महालक्ष्म्याकुलाकुले नामा
दिचक्रे सर्वेषां भूतचक्रे तथैव च ॥ गोपाले अडमः स्मृतः ॥ इति वचनात् ॥ वैसवे राशिसंशुद्धं शैवे चाकडमं स्मृतं ॥ इति जामलीय
वचनात् शिवविषयमपि अथ ऋणधनिचक्रं यथा कोष्ठान्येकादश न्यस्य वेदेन पूरितानि च अकारादि हकारांतं लिखेत्कोष्ठे
षु तत्त्ववित् प्रथमं पंचकोष्ठेषु ह्रस्वदीर्घक्रमेण तु द्वयं द्वयं लिखेत्तत्र विचारे खलु साधकः शेषेष्वेकैकशो वर्णानुक्रमशस्तु लिखे
त्सुधीः तथा ह्येतौ स्वरौ पंचसु कोष्ठकेषु शेषान्स्वरान्षट्सु षडेकमकं कादीन् शेषान् विलिखेत् तेष्वमन् एकैकमकादशसु त्रिके
षु षट्कालकालवियद्दिक्समुद्रवेदस्वाकाशभून्यदहनाः खलु साध्यवर्णाः युग्म द्विपंचविपदं वरयुक् शशांकव्योमाग्निवेदशशि
नः खलु साधकार्णाः नामार्णादंक वाङ्ज भुक्ते शेषं ज्ञात्वा भयोरधिकशेष मृणं धनं स्यात् अस्यार्थः ॥ साध्यवर्णान्स्वरयं

७ जनभेदेन पृथक्कृतान् षट्कालेन द्वैके गुणितान् कृत्वा तथा साधकनामाद्यक्षरान् युग्माद्येरंके गुणितान् कृत्वाऽष्टसंख्याभि
र्हृत्वा उभयोः मध्ये साधकयोर्यदधिकं तद्दृणं यन्न्यूनं तद्धनं एवं ज्ञात्वा मंत्रं दद्यात् तंत्रांतरे ॥ मंत्रो यद्यधिकांकः स्यात्तदा
मंत्रं जपेत्सुधीः समं च प्रजपेन्मंत्रं न जपेत्तु ऋणाधिके शून्ये मृत्युं विजानीयात् तस्मात् शून्यं विवर्जयेत् ॥ यदा मंत्राश्च ऋणी भ
वति तदा शुभप्रदः धनी चेन्न तथा शुभमित्यर्थः इन्द्रक्षेनेत्ररविपंचदशर्तुवेदवह्न्यायुधाष्टनागैर्गुणितानां स्वसाध्यात् ॥ दिग्भू
गिरिरुद्रतिगजाग्निमुनीषुवेदषट्त्रयस्तुगुणितान् तथ साधकानां ॥ नामाङ्कृत्वादिकं तु विस्मृतविषयं रामार्जुनचन्द्रि
काधृतत्वादिति सांप्रदायिकाः ॥ वस्तुतस्तु पूर्वस्यैव विवरणमेतत् इन्द्रक्षेत्यनंतरं तथा च नामार्णकोष्ठांकमथाभिह
न्यादेकादिरुद्रांकगतं क्रमेणेति आदिकोष्ठात् साधकांकसाध्यांकगृहसंख्यया पूरयित्वाष्टभिः शेषादधिकांकोऋणी राम
भवेत् यच्चक्रं रुद्रजामले ॥ साध्यांकान् साधकांकांश्च पूरयेत् गृहसंख्यया गुणितेन तु हृते अष्टाभिर्यत् शेषं जायते स्फुटं तदं ७
कं कथयाम्यत्र एकादशगृहास्ति तमित्युक्त्वा षट्कालेनेत्युक्तं तथा नामाद्यक्षरमारभ्य यावन्मंत्रादिमं भवेत् त्रिधा कृत्वा

स्वरैर्भिन्नं तदन्यद्विपरीतकं अस्यार्थः साधकनामाद्यक्षरेतोगणनया यावन्मंत्राद्यक्षरं तत्संख्यां त्रिधा कृत्वा सप्तभिर्हृत्वाधि
कं ऋणं शेषं धनं स्यात् तदन्यदिति मंत्राक्षरमारभ्य यावत्साधकनामाद्यक्षरं भवेत् तावत्संख्यां सप्तगुणां कृत्वा त्रिभिर्हरे
त् ॥ तथा साध्यनामद्विगुणितं साधकेन समन्वितं अष्टभिश्च हरेच्छेषं तदन्यद्विपरीतकं अस्यार्थः साध्यनामस्वरव्यंज
नभेदेन द्विगुणीकृत्य साधकनामाक्षरे संयोज्याष्टभिर्हृत्वा ऋणं धनं ज्ञेयम् तदन्यदिति साधकनामाक्षरान् स्वरव्यंजनरू
पेण द्विगुणीकृत्य साध्याद्यक्षरेण स्वरव्यंजनभेदेन संयोज्याष्टभिर्हृत्वाऽपि कं ऋणं शेषं धनं ज्ञेयमिति नामग्रहणप्रका
रमाह पितृमातृकृतं नाम तत्क्रमाशर्मादिदेवकान् श्रीवर्णं च ततो विहाय चक्रे प्रयोजयेत्क्रमात् अथ दीक्षाकालः मंत्रा
रंभस्तु चैत्रे स्यात् समस्तपुरुषार्थदः वैशाखे रत्नलाभः स्यात् ज्येष्ठे तु मरणं भवेत् आषाढे बंधुनाशः स्यात् पूर्णायुः श्रावणे
भवेत् प्रजानाशो भवेद्भाद्रे आश्विने रत्नसंचयः कार्त्तिके मंत्रसिद्धिः स्यान्मार्गशीर्षे तथा भवेत् पौषे तु शत्रुपीडा स्यान्मा
घे मेधाविवर्द्धनं फाल्गुने सर्वकामाः स्युर्मलमासं विवर्जयेत् चैत्रे इति गोपालविषयं गौतमप्रोक्तत्वात् मधुमासे भवेद्दीक्षाऽ

८ खायेतिवचनात् नान्यत्र ॥ अथवारनियमः ॥ रविवारे भवेद्वित्तं सोमे शान्तिर्भवेत्किल आयुरङ्गारके हन्ति तत्र दीक्षां वि
वर्जयेत् ॥ बुधे शौंदर्यमाप्नोति ज्ञानं स्याच्च बृहस्पतौ शुक्रे सौभाग्यमाप्नोति यशोहानिः शनैश्चरे अथ तिथिनियमः ॥
प्रपदि कृता दीक्षा ज्ञाननाशकरी मता भवेज्ज्ञानं द्वितीयायां तृतीयायां शुचिर्भवेत् ॥ चतुर्थ्यां वित्तनाशः स्यात् पंचम्यां
बुद्धिवर्द्धनं षष्ठ्यां ज्ञानक्षयं सौख्यं लभते सप्तमीदिने अष्टम्यां बुद्धिनाशः स्यात् नवम्यां वपुषः क्षयः दशम्यां राजसौ
भाग्यं एकादश्यां शुचिर्भवेत् द्वादश्यां सर्वसिद्धिः स्यात् त्रयोदश्यां दरिद्रता तिर्य्यग्योनिश्चतुर्दश्यां हानिर्म्मासावसान
के पक्षांते धर्म्मबुद्धिः स्यात् अस्वाध्यायं विवर्जयेत् ॥ संध्यागर्जितनिर्घोषभूकंपोल्कानिपातने एतानन्यांश्च दिवसान् राम
स्मृत्युक्तान् परिवर्जयेत् द्वितीया पंचमी चैव षष्ठी चैव विशेषतः द्वादश्यामपि कर्तव्यं त्रयोदश्यामथापि वेति यत्तु त्रयोदशी ८
षष्ठीविधानं तद्धिंस्क विषयं रामार्चनचंद्रिकाधृतत्वात् ॥ पंचमी सप्तमी षष्ठी द्वितीया पूर्णिमा सिता त्रयोदशी च दशमी
प्रशस्ता सर्वकामदेति सनत्कुमारवचनात् ॥ अथ नक्षत्रनियमः ॥ अश्विन्यां सुखमाप्नोति भरण्यां मरणं ध्रुवं कृत्तिकायां

भवेद्दुःखी रोहिण्यां वाक्पतिर्भवेत् मृगशीर्षे सुखावाप्तिरार्द्रायां बंधुनाशनं पुनर्वसौ धनाढ्यः स्यात् पुष्ये शत्रुविनाशनं
आश्लेषायां भवेन्मृत्युर्मघायां दुःखमोचनं सौन्दर्य्यं पूर्वफल्गुण्यां प्राप्नोति च न संशयः ज्ञानं चोत्तरफल्गुण्यां हस्तायां च
सुखी भवेत् चित्रायां ज्ञानसिद्धिः स्यात् स्वात्यां शत्रुविनाशनं विशाखायां सुखं चानुराधायां बंधुदर्शनं ज्येष्ठायां सुतहानिः
स्यात् मूलायां कीर्तिवर्द्धनं पूर्वाषाढोत्तराषाढे भवेतां कीर्तिदायके श्रवणायां भवेद्दुःखी धनिष्ठायां दरिद्रता बुद्धिः शतभिषा
यां स्यात् पूर्वभाद्रे सुखी भवेत् सौख्यं चोत्तरभाद्रे च रेवत्यां कीर्तिवर्द्धनं योगादिनियमं तु विश्वसारे शुभः सिद्धिस्तथायुष्मान्
ध्रुवयोगस्ततः परं प्रीतिः सौभाग्ययोगश्च वृद्धियोगस्ततः परं हर्षणश्च तथा योगाः सर्वतत्र शुभावहाः बवकौलवते
तिलो वणिजस्तदनंतरं करणानि शुभान्येव सर्वतंत्रेषु भाविनि अथ लग्ननियमः वृषसिंहे च कन्यायां धनुर्मीनाख्यल
ग्नके चन्द्रतारानुकूले च कुर्याद्दीक्षाप्रवर्तनं अथ पक्षनियमः शुक्लपक्षे शुभा दीक्षा कृष्णे स्यात् पंचमादिनात् निषि
द्धेष्वपि मासेषु तत्र द्विशोषामुनिभेदतः रत्नावल्यां षष्ठी भाद्रपदे पौषे तथा कृष्णचतुर्दशी कार्तिके नवमी शुक्ला तृतीया पिका
मार्गे शुक्ले

२म

पौषेतुनवमीशुक्लामाघेशुक्लचतुर्थिका फाल्गुणेनवमीशुक्लाचैत्रेकामचतुर्दशी कौवेशाखेचाक्षयाचैवज्येष्टेदशहरा
तिथिः आषाढेपंचमीशुक्लाश्रावणेकृष्णपंचमी एतानिदेवपर्वाणितीर्थकोटिफलंलभेत् अत्रदीक्षाप्रकर्त्तव्यानमा॰
संचपरीक्षयेत् नवारंनचनक्षत्रंनतिथ्यादिकदूषणं नयोगकरणंचैवशंकरेणचभाषितं अन्यमतं चैत्रेत्रयोदशीशुक्ला
वैशाखेकादशीसिता ज्येष्टचतुर्द्दशीकृष्णाआषाढेनागपंचमीश्रावणेकादशीभाद्रेरोहिणीसहिताष्टमी आश्विनेतु
महापुण्यामहाष्टम्याप्यभीष्टदा कार्त्तिकेनवमीशुक्लामार्गशीर्षेतथासिता फाल्गुनेचसिताषष्ठीचेतिकालविनिर्ण
यः योगिनीतंत्रे॥अयनेविषुवेचैवग्रहणेचंद्रसूर्य्ययोः रविसंक्रांतिदिवसेयुगाद्यायांसुरेश्वर मन्वंतरासुसर्वासुमहा
पूजादिनेतथा चतुर्थीपंचमीचैवचतुर्दश्यष्टमीतथा तिथयःशुभदाःप्रोक्ताइत्यादिवचनात् चतुर्दश्यष्टमीतिशाक्तविष राम
यं॰चतुर्थीतिगणेशविषयंतत्तत्कल्पोक्तत्वात् निंदितेष्वपिकालेषुदीक्षोक्ताग्रहणेशुभा सूर्य्यग्रहणकालस्यसमानो
नास्तिभूतले तत्रयद्यत्कृतंसर्व्वमनंतफलदंभवेत् नवारतिथिमासादिशोधनंसूर्य्यपर्व्वणि एवंचंद्रग्रहणेपि रविसंक्रम

२१

णेचैवसूर्य्यस्यग्रहणेतथा नवलग्नादिकंकिंचिन्नविचार्य्यंकथंचन रविसंक्रांतिदिवसेनान्यदन्वेषितंभवेत् रुद्रयामले नकु
र्य्याच्छाक्तिकींदीक्षामुपरक्तेविभावसौ नकुर्य्याद्वैष्णवींतांतुयदिचन्द्रग्रहोभवेत् एतच्चश्रीगोपालश्रीविद्येतरविषयं अन्येषु
पुण्ययोगेषुग्रहणेचन्द्रसूर्य्ययोरितिगौतमीयात्॥सूर्य्यग्रहणकालेनमुनान्यदन्वेषितंभवेदितियोगिनीहृदयाच्च अमा
वास्यासोमवारेभौमवारेचतुर्द्दशी सप्तमीरविवारेचसूर्य्यपर्वशतैःसमाः शिष्यानाहूयगुरुणाकृपयादीयतेयदा त
दालग्नादिकंकिंतुनविचार्य्यंकथंचन तथा सर्व्वेवाराग्रहाःसर्व्वेनक्षत्राणिचराशयः यस्मिन्नहनिसंतुष्टोगुरुःसर्व्वे
शुभावहाः योगिनीतंत्रे॥ग्रहणेचमहातीर्थेनास्तिकालस्यनिर्णयः गयायांभास्करक्षेत्रेविरजेचंद्रपर्वते षट्सुचैलेमतं
गेचतथाकन्याश्रमेषुच नगृह्णीयात्ततोदीक्षांतीर्थेष्वेतेषुपार्वतिवाराहीतंत्रे॥शुक्रास्तेयदिवास्तेगुर्वादित्योभवेद्य
दि मेषवृश्चिकसिंहेषुतदादोषोनविद्यते॥महाविद्यासुकालादिनियमोनास्ति तदुक्तंचामुंडातंत्रे॥कालादिशोधनंना
स्तिनचामित्रादिदूषणमितिवचनात् अथमालानिर्णयः सनत्कुमारसंहितायां तर्जनीमध्यमानामाकनिष्ठोक्त

तितांक्रमात् तिस्रोऽंगुल्यस्त्रिपर्वाणोमध्यमाचैकपर्विणी पर्वद्वयंमध्यमायांमेरुत्वेनोपकल्पयेत् तत्रक्रममाह ॥ अनामा
१० मध्यमारभ्यकनिष्ठादितएवच तर्जनीमूलपर्यंतंदशपर्वसुसंजपेत् तथा अनामामूलमारभ्यकनिष्ठादितएवच तर्जे
नीमध्यपर्यंतमष्टपर्वसुसंजपेत् एतद्वचनद्वयंत्वष्टोत्तरशतविषयं ॥ शक्तिविषयेपुनः ॥ अनामिकात्रयंपर्वकनिष्ठादित्रि
पर्विका मध्यमायाश्चत्रितयंतर्जनीमूलपर्वणि तर्जन्यग्रेतथामध्येयोजपेत्सतुपापकृत् ॥ इतिश्रीक्रमवचनात् हंसपारमे
श्वरे पर्वद्वयमनामायाः परिवर्तक्रमेणवै पर्वत्रयंमध्यमायास्तर्जन्येकंसमाहरेत् पर्वद्वयंतुतर्जन्यामेरुंतद्विपाबेति शक्ति
माला समाख्याता सर्वतंत्रप्रदीपिका तथा अनामामूलमारभ्यप्रादक्षिण्यक्रमेणवै मध्यमामूलपर्यंतंजपेदष्टसुपर्व राम
सु इदमष्टोत्तरशतविषयं मुण्डमालातंत्रे अनामिकाद्वयंपर्वकनिष्ठादिक्रमेणतु तर्जनीमूलपर्यंतंकरमालाविधि
धीयते श्रीविद्यायांतुविशेषः अनामामध्यमायाश्चमूलाग्रंचद्वयंद्वयं कनिष्ठायाश्चतर्जन्याश्चयंपर्वसुकरेष्वपि अनामा १०
मध्यमायाश्चमेरुः स्याद्वितयंशुभं प्रदक्षिणक्रमाद्देविजपेत्त्रिपुरसुंदरी मितिजामलवचनात् ॥ अंगुलीर्न्नवियुंजीतकिं

चिदाकुंचितेतले अंगुलीनांवियोगाच्चछिद्रेचश्रवतेजपः अन्यत्रापि अंगुल्यग्रेषुयज्जप्तंयज्जप्तंमेरुलंघनं पर्वसंधिषुयज्जप्तं
तत्सर्वंनिष्फलंभवेत् ॥ गणनाविधिमुल्लंघ्ययोजपेत्तज्जपंयतः गृह्णंतिराक्षसास्तेनगणयेत्सर्वथाबुधः विश्वसारे जपसंख्या
तंजपेत्सुधीः नसंख्याकारकस्यास्यसर्वंभवतिनिष्फलं तंत्रोहृदये हस्तमारोप्यतिर्यक्कृत्वाकरांगुली आच्छाद्यवास
साहस्तंदक्षिणेनसदाजपेत् सनत्कुमारे क्रमोत्क्रमगतैर्मालामातृकार्णैः समेरुकैः सबिंदुकैः साष्टवर्गैरंतर्यजनकर्म्म
णि आदिकुचुटुतुपुयुशवाःशेषप्रकीर्तिताः तत्रायमर्थः अकारादीनांवर्णानांकवर्गादीनांचांतिमवर्णंसानुस्वारंकृत्वा
पूर्वमुच्चार्यमंत्रजपःकार्य्यः अनेनप्रकारेणाष्टोत्तरशतसंख्यजपोभवति अंतर्यजनत्वफलक्षणं तथासबिंदुंवर्ण
मुच्चार्यपश्चान्मंत्रंजपेद्बुधः अकारादिक्षकारांतंबिंदुयुक्तंविभाव्यच वर्णमालासमाख्याताअनुलोमविलोमिकेति
नारदवचनात् विशुद्धेश्वरे अनुलोमविलोमेनवर्णाष्टकविभेदतः मंत्रेणांतरितान्वर्णान्वर्णानांतरितान्मनून् कुर्या
द्वर्णमयीमालांसर्वतंत्रप्रकाशिनीं मालिनीविजयेस्तत्रनियमः अंतर्विद्रुमभासमानभुजगीसुप्तोत्थवर्णोज्ज्वलामारो

हः प्रतिरोहतः शतमयी वर्गा एकाशोत्तरा अथ मालायां मणिनियमाः पद्मबीजादिभिर्माला वहिर्यागेष्टप्रशस्यनाः पद्माक्षशं
खरुद्राक्षपुत्रजीवकमौक्तिकैः स्फाटिकैर्मणिरत्नैश्च सौवर्णैर्मौक्तिकैस्तथा राजतैः कुशमूलैश्च गृहस्थस्याक्षमालि-
का अंगुलीगणनादेकं पर्वणाष्टगुणं भवेत् पुत्रजीवैर्दशगुणं शतं शंखैः सहस्रकं प्रवालैर्मणिरत्नैश्च दशसाहस्रकं स्मृ-
तं तदेव स्फाटिकैः प्रोक्तं मौक्तिकैर्लक्षमुच्यते पद्माक्षैर्दशलक्षं स्यात्सौवर्णैः कोटिरुच्यते ॥ कुशग्रन्थ्या कोटिशतं रु-
द्राक्षैः स्यादनन्तरं सर्वैर्विरचिता माला नृणां मुक्तिफलप्रदा कालिकापुराणे ॥ रुद्राक्षैर्वाथ दिजपेदिन्द्राक्षैः स्फाटिकैस्त-
था नान्यत्र मध्ये प्रयोक्तव्यं पुत्रजीवादिकं च यत् यद्यन्यत्तु प्रयुंजीत मालायां जपकर्मणि तस्याकामं च मोक्षं च ददाति न
श्रियंकरी मुंडमालायां श्मशाने धुस्तूरे माला ज्ञेया धूमावती विधौ नरांगुल्यस्थिभिर्माला ग्रथिता सर्वकर्मदा नाड्यासंग्र-
थितं कार्य्यं रक्तेन वा सता प्रिये सदा गोप्या प्रयत्नेन जननन्या जारवत्प्रिये कामनाभेदतु पद्माक्षैर्विहिता माला शत्रूणां
नाशिनी मता कुशग्रंथिमयी माला सर्वपापप्रनाशिकी पुत्रजीवफलैः क्लृप्ता कुरुते पुत्रसंपदां निर्मितान्न्यमालाभिर्ज-

पमालेप्सितप्रदा प्रवालैर्विहिता माला प्रयच्छेत्पुष्कलं धनं ॥ भैरवीविद्यायां तु वाराहीतंत्रे सुवर्णमणिभिर्माला स्फाटिकीं
शंखनिर्मितां प्रवालैरेव धा कुर्यान्न पुत्रजीवं विवर्जयेत् ॥ पद्माक्षं चैव रुद्राक्षमिंद्राक्षं च विशेषतः त्रिपुरामंत्रजपादौ तु र-
क्तचंदनबीजादिभिरति प्रशस्ता तथा वतंत्रे रक्तचंदनमाला तु भोगदा मोक्षदा भवेत् तथा वैष्णवे तु तुलसीमाला गजदंतेन गं-
णेश्वरे त्रिपुरायाजपे शस्ता रुद्राक्षैरक्तचंदनैः मुंडमालायां महाशंखमयी माला नीलसारस्वते विधौ नृललाटास्थिख-
ण्डेन रचिता जपमालिका महाशंखमयी माला ताराविद्याजपे प्रिया कर्णनेत्रांतराला स्थि महाशंख प्रकीर्तिताः मा-
ला नियमस्तु मुंडमालायां अन्योन्यसमरूपाणि नातिस्थूलकृशानि वै कीटादिभिरदष्टानि न जीर्णानि व्रणानि वै तु-
था च गौतमीये पंचाशन्मणिभिर्माला विहिता सर्वकर्मसु अकारादिक्षकारांतावर्णमाला प्रकीर्तिताः क्षार्णं मेरुमुखे तु
तत्र कल्पयेन्मुनिसत्तम अनया सर्वमंत्राणां जपः सर्वसमृद्धिदः चामुण्डातंत्रे ॥ नित्यं जपं करे कुर्यान्न तु काम्यमतो बुध
नात् काम्यं चापि करे कुर्यान्माला भावे प्रियंवदे तेन काम्यकर्मणि मालायाः प्राधान्यं कामनाभेदे तु गौतमीये समासेन

१२ क्षस्तत्रस्य विधानमिह कथ्यते पंचविंशतिभिर्मोक्षस्त्रिंशद्भिर्धनसिद्धये सर्वार्थाः सप्तविंशत्या पंचदश्याभिचारिके पंचाशद्भिः
काम्यासिद्धिः स्यात्तथा चतुरुत्तरैः अष्टोत्तरशतैः सर्वसिद्धिरुक्ता मनीषिभिः अथासनभेदाः॥ काम्यार्थं कंबलं चैव श्वेतं रक्तं कं
बलं कृष्णाजिने काम्यसिद्धिर्मोक्षः श्रीर्व्याघ्रचर्मणि कुशासनेन मंत्रसिद्धिर्नात्र कार्या विचारणा धरण्यां दुःखसंभूतिर्दौर्भाग्यं दा
रुजासने॥ वंशासने दरिद्रः स्यात् पाषाणे व्याधिपीडितं तृणासने यशोहानिः पल्लवे चित्तविभ्रमः जपध्यानतपोहानिं वस्त्रा
सनं करोति हि अत्र वस्त्रासनं केवलमेव निषिद्धं॥ वस्त्रासनं रोगहरमित्यादि विशिष्टस्य फलजनकत्वाभिधानात्॥ चैलाजि
नकुशोत्तरमिति भगवद्वचनाच्च योगिनीहृदये॥ नादीक्षितो विशेज्जानुकम्मारा जिनेगृही विशेषतो निर्धनस्थश्च ब्रह्मचा
री च भिक्षुक इति आगमकल्पद्रुमे॥ मेषव्याघ्रगजेंद्रऋक्षोरगत्वचां तु पट्टकम्बलकं विहितासनानि अथमाला
संस्कारः सनत्कुमारीये॥ कार्पाससंभवं सूत्रं धर्मकामार्थमोक्षदं तच्च विप्रेंद्रकन्याभिर्निर्मितं च सुशोभनं शुक्लं रक्तं
तथा कृष्णं पट्टसूत्रमथापि वा शांतिवश्याभिचारेषु मोक्षैश्वर्यजयेषु च शुक्लं रक्तं तथा पीतं कृष्णं वर्णेषु च क्रमात् सर्वेषा

स्फुटं तमं वर्णमालाख्यां प्रसंपर्वं मालयोः॥ अ
धर्मं मालिकाद्युक्तं गाधुत्रीविधिपं भवेत्

राम १२

मेव वर्णानां रक्तं सर्वेप्सितप्रदं आश्रमे वृत्तिगुणं त्रिगुणीकृत्य ग्रंथयेच्छिल्पशास्त्रतः एकैकं मातृकावर्णं समुच्चार्य प्रजपन् सुधीः
मणिमादाय सूत्रेण ग्रंथयेन्मध्यमध्यतः ब्रह्मग्रंथिं विधायेत्थं मेरुं च ग्रंथिसंयुतम् ग्रथयित्वा पुरो मालां ततः संस्कारमार
भेत्॥ कस्यचिन्मतेस्त्वविद्यायाग्रथयेत् तथा च कवीरकल्पे मातृकामंत्रतो ग्रंथिविद्यया वाथ कारयेत् सुवर्णाद्रिगुणेनापि
ग्रंथयेत्साधकोत्तमः ब्रह्मग्रंथिं ततो दद्यान्नागपाशमथापि वा कवचेनाथवध्नीयात् मालां ध्यानपरायणः सर्वशेषे ततो
मेरुं सूत्रद्वयसमन्वितं ग्रथयेत्तारयोगेन वध्नीयात्साधकोत्तमः एवं निष्पाद्य देशिकः प्रतिष्ठां च समाचरेत् गौतमीये मुखं मुखं
च संयोज्य पुच्छे पुच्छं नियोजयेत् तन्मध्ये स्थापयेन्मालां मातृकां मूलमुच्चरन् क्षालयेत् पंचगव्येन सद्योजातेन सज्जलैः सद्यो+
गोपुच्छसदृशी मालाथवा सर्पाकृतिः शुभाः एवं निर्माय मालां वै शोधयेन्मुनिसत्तमः अश्वत्थपत्रनवकैः पद्मा
कारं तु कल्पयेत् + जातमंत्रस्तु॥ ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमः भवे भवे नादिभवे भजस्व मां भवोद्भव चंदना
गरुकर्पूरैर्वामदेवेन घर्षयेत् वामदेवमंत्रस्तु ॐ वामदेवाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलप्रमथना

यनमः सर्वभूतदमनायनमः उन्मनायनमः धूपयेन्नामघोरेण॥ अघोरमंत्रस्तु ॐ अघोरेभ्योऽथघोरेभ्योघोरघोरतरेभ्यः सर्वतः
१३ सर्वेभ्योनमोस्तुरुद्ररूपेभ्यो लेपयेत्पुरुषेणच मंत्रस्तु ॐ तत्पुरुषायविद्महे महादेवायधीमहि तन्नोरुद्रःप्रचोदयात् मंत्र
येत्पंचमेनेवप्रत्येकंतुशतंशतं मेरुंचमंत्रयेत्तद्वत्मनुनाचशतंशतं मंत्रस्तु ॐ ईशानःसर्वविद्यानामीश्वरः सर्वभूतानां
ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्माशिवोमेस्तु सदाशिवोम् प्रत्येकंतुसकृत्सकृदितिवानथाचतत्रैव प्रत्येकंमंत्रयेन्मंत्रीपंच
मेनसकृत्सकृत् तथाचगौतमीयेसमुदायमालामधिकृत्य पंचमेनैवसर्वैकेनशतान्यूनेनमंत्रयेत् इतिदर्शनात् मालायां
वाशतजपः तत्रावाह्ययजेद्देवं यथाविभवविस्तरैः मालायांप्राणप्रतिष्ठानंतरं देवतांपूजयेत् तथाचसनत्कुमारीयेसंस्कृ
त्यैवंबुधोमालांतत्प्राणांस्तत्रस्थापयेत् मूलमंत्रेणतांमालांपूजयेद्द्विजसत्तम वाराहीतंत्रे ॐमालेमालेमहामालेसर्वत राम
त्त्वस्वरूपिणि चतुर्वर्गस्त्वयिन्यस्तस्तस्मान्मेसिद्धिदाभव मायाबीजादिकंकृत्वारक्तपुष्पैःसमर्चयेत् शक्तिविषयेतुवाग्भ १३
वंलक्ष्मीबीजंचअक्षादिमालिकांततः ॐ तांहृदयवर्णांतांमंत्रेणानेनपूजयेत्॥ तथा मंत्रयेन्मूलमंत्रेणक्रमेणोत्क्रमयोग

गतः तथैवमातृकावर्णैर्मंत्रयेत्तांतुमंत्रवित् योगिनीतंत्रे होमकर्मततःकुर्यात्देवताभावसिद्धये॥ अष्टोत्तरशतंहुत्वासंपा
ताज्यंविनिक्षिपेत् होमकर्मण्यशक्तश्चेद्द्विगुणंजपमाचरेत् नान्यंमंत्रंजपेन्मंत्री कंपयेन्नविधूनयेत्॥ कंपनात्सिद्धिहानिःस्या
त्धूननंबहुदुःखदं शब्देजातेभवेद्रोगः करभ्रष्टाद्विनाशकृत्॥ छिन्नेसूत्रेभवेन्मृत्युस्तस्माद्यत्नपरोभवेत् त्वंमालेसर्वदेवानां
सर्वसिद्धिप्रदामता तेनसत्येनमेसिद्धिंदेहिमातर्नमोस्तुते॥ इत्युक्त्वापरिगृह्याचगोपयेद्यत्नतोगृही रुद्रयामले॥ अ
प्रतिष्ठितमालाभिर्मंत्रंजपतियोनरः सर्वंतन्निष्फलंविद्यात्क्रुद्धाभवतिदेवता॥ कामनाभेदेऽङ्गुलिनियमः गौतमीये त
र्जन्यंगुष्ठयोगेनशत्रूच्चाटनकारकं अंगुष्ठमध्यमायोगान्मंत्रसिद्धिःसुनिश्चिता अंगुष्ठानामिकायोगादुच्चाटेत्सादने
मते ज्येष्ठाकनिष्ठायोगेनशत्रूणांनाशनंमतं वैशंपायनसंहितायां अंगुष्ठस्याग्रमस्तमालांचालयेन्मध्यमध्यतः जीर्णे
सूत्रेपुनःसूत्रंग्रथयित्वाशतंजपेत् प्रमादात्पतिताहस्तात्शतमष्टोत्तरंजपेत्॥ जपेन्निषिद्धसंस्पर्शेक्षालयित्वायथो
चितं छिन्नेप्यष्टोत्तरशतंजपः करभ्रष्टछिन्नयोस्तुल्यत्वात् तदुक्तंकुब्जिकातंत्रे छिन्नेसूत्रेपुनर्मालांग्रथयित्वाशतंज

पेत् नृपेनिषिद्धसंस्पर्शे क्षालयित्वायथोचितं छिन्नेप्यशेत्तरशतंजपः करभृहच्छिन्नयोस्तुल्यत्वात् अथपुरश्चरणं योगिनी
१८ हृदये गुरोराज्ञांसमादाय प्रकृष्टांतःकरणोनरः ततःपुरश्चिक्रयांकुर्यान्मंत्रसंसिद्धिकाम्यया जीवहीनोयथादेहीसर्वकर्मसु
नक्षमः पुरश्चरणहीनोपितथामंत्राःप्रकीर्तिताः तस्मादादौस्वयंकुर्यात्कारयेद्वाकरयेद्बुधः गुरोरभावेविप्रैर्वासर्वप्राणिहि
तेरतः स्निग्धंशास्त्रविदंमित्रंनानागुणसमन्वितं॥ स्त्रियंचसकुगुणोपेतंसपुत्रांविनियोजयेत् आदौपुरश्चिक्रयांकेतु
स्थाननिर्णयउच्यते योगिनीहृदये॥ पुण्यक्षेत्रंनदीतीरंगुहापर्वतमस्तकं तीर्थप्रदेशाःसिंधूनांसंगसंगमःपावनंवनं
उद्यानानिविविक्तानिबिल्वमूलंतटंगिरेः॥ तुलसीकाननंगोष्ठंवृषशून्यंशिवालयं॥ अश्वत्थामलकीमूलंगोशालाज
पमध्यतःदेवतायतनंकूलंसमुद्रस्यनिजंगृहं तथा गेहेशतगुणंविद्यात्गोष्ठेलक्षगुणंस्मृतं कोटिदेवालयेपुण्यमनंतंशि राम
वसन्निधौ तथा गृहेगोष्ठेवनारामेनदीनगशिवालये गुरोर्वासन्निधौतत्रसजपःपरमोमतः जपमेकगुणंगेहेगोष्ठेदश १८
शगुणंभवेत्॥ वनांतरेशतगुणंतडागेवसहस्रकं नदीतीरेलक्षगुणंनगरेकोटिसम्मितं॥ शिवालयेकोटिशतंमननंगुरुसं

न्निधौ म्लेछदुष्टमृगव्यालशंकातंकविवर्जिते एकांतपावनेनिन्दारहितेभक्तिसंयुते सुदेशेधार्मिकेदेशेसुभिक्षेनिरुपद्रवे
रम्येभक्तजनस्थानेनिवसेत्तापसःप्रिये॥ गुरूणांसन्निधानेचचित्तैकाग्रस्थलेतथा एषामन्यतमंस्थानंमाश्रित्यजपमारभेत्
यत्रासीनोजपेन्मंत्रीतत्रकूर्म्मंविचिंतयेत्॥ गौतमीये पर्वतेसिंधुतीरेवापुण्यारण्येनदीतटे यदिकुर्यात्पुरश्चर्यांतत्रकूर्मंवि
चिंतयेत् ग्रामेवायदिवावास्तौगृहेतंचविचिंतयेत्॥ एकलिंगेश्मशानेवाशून्यागारेचतुःपथे शवोपरिचितायांवाजपेन्म
त्रमनन्यधीः॥ अथपुरश्चरभक्ष्याभक्ष्यनिर्णयः॥ अगस्त्यसंहितायां॥ दध्यक्षीरंघृतंगव्यंमैक्षवंगुडवर्जितं तिलाश्चैवसिता
मधुरत्न मुद्गाःकंदःकेमुकवर्जितः नारिकेलफलंचैवपनसंचहरीतकी व्रतांतरप्रशस्तंचहविष्यंमन्यतेबुधैः व्रतांतरइतिहेमंति
कसिताःस्विन्नमित्यादि यत्तुयोगिनीतंत्रे॥ चिंचांचनालिकाशाकंकलायंलकुचंतथा कदंबंनारिकेलंचव्रतेकूष्मांडकं
त्यजेत्॥ अत्रचिंचामलकीनतुव्रतांतरेवोद्धव्यं॥ भुंजानोवाहविष्यान्नंशाकंयावकमेववा पयोमूलंफलंवापियच्चयत्रोप
लभ्यते अथवर्ज्याणि विवर्जयेन्मधुक्षारंलवणंतैलमेवच तांबूलंकांश्यपात्रंचदिवाभोजनमेवच तथाक्षारंचलवणंमां

१५ संमर्जनं कांस्यभोजनं माषाटकीमसूरांश्च कोद्रवांश्चणकानपि रामार्चनचंद्रिकायां ॥ मैथुनं तत्कथालापं तद्गोष्ठीं परिव
र्जयेत् ॥ ऋतुकालं विना नैव स्वस्त्रियं नातिसंस्पृशेत् ॥ लवणं च पलं चैव क्षारं क्षौद्रं रसान्तरं ॥ कौटिल्यं क्षौरमभ्यंगमनिवे
दितभोजनं असंकल्पितनैकृत्यं च वर्जयेन्मर्दनादिकं स्नायाच्च पंचगव्येन केवलामलकेन वा मंत्रजप्तान्नपाणीयैः स्नानाच
मनभोजनं कुर्याद्यथोक्तविधिना त्रिसंध्यं देवतार्चनं अपवित्रकरो नग्नः शिरसि प्रावृतोऽपि वा प्रलपन्प्रजपेद्यावत्ताव
न्निष्फलमुच्यते ॥ कुलार्णवे ॥ यस्यान्नपानपुष्टांगः कुरुते धर्मसंचयं ॥ अन्नदातुः फलस्यार्द्धं कर्तुश्चार्द्धं न संशयः तस्मा
त्सर्वप्रयत्नेन परान्नं वर्जयेत्सुधीः पुरश्चरणकाले तु सर्वकर्मस्तु शोभने जिह्वा दग्धा परान्नेन करौ दग्धौ प्रतिग्रहात् मनो द
ग्धं परस्त्रीभिः कथं सिद्धिर्वरानने परान्नं भिक्षितं नेतरपरं ॥ भिक्षायां तस्य संस्कारादत्वात् तथा च ॥ वैदिकाचारयुक्ता
नां शुचीनां श्रीमतां सतां सत्कुलस्थानजातानां भिक्षाशी चाग्रजन्मनां सकृदुच्चरिते शब्दे प्रणवं समुदीरयेत् ॥ क्षोके पार राम १५
प्राद्दे प्रणवं समुदीरयेत् ॥ विण्मूत्रोत्सर्गशंकादियुक्तः कर्म करोति यः जपार्चनादिकं सर्वमपवित्रं भवेत्प्रिये मलिनांबरकेशा

दिमुखदौर्गंध्यसंयुतः यो जपेत्तं दहत्याशु देवता गुप्तिसंयुता आलस्यं जृंभणं निद्रां क्षुतं निष्ठीवनं भयं नीचांगस्पर्शनं को
पं जपकाले विवर्जयेत् ॥ एवमुक्तविधानेन विलंबं त्वरितं विना उक्तसंख्यं जपं कुर्यात् पुरश्चरणसिद्धये देवतागुरुमंत्राणा
मैक्यं संभावनाधिया जपेदेकमनाः प्रातःकालं मध्यंदिनावधि यत्संख्यायां समारब्धं तत्कर्तव्यमनं द्वितयदिन्यूनाधिकं
कुर्यात् व्रतभ्रष्टो भवेन्नरः मुंडमालायां ॥ यत्संख्यायां समारब्धं तज्जप्तव्यं दिने दिने न्यूनाधिकं न कर्तव्यं आसमाप्तं सदा जपे
त् ॥ कुलार्णवे ॥ न्यूनातिरिक्तकर्माणि न फलंति कदाचन यथाविधिकृतान्येव सत्कर्माणि फलंति हि ॥ भूशय्या ब्रह्म
चारित्वं मौनमाचार्यसेविता नित्यं त्रिसवनं स्नानं क्षुद्रकर्मविवर्जनं नित्यपूजा नित्यदानं देवतास्तुतिकीर्तनं ॥ नैमित्तिका
र्चने चैव विश्वासो गुरुदेवयोः ॥ रुद्रयामले ॥ नाक्षैर्न हस्तपर्वैर्वा न धान्यैर्न च पुष्पकैः न चंदनैर्मृत्तिकया जपसंख्यां समाचरेत् ॥
लाक्षाकुशीदसिंदूरं गोमयं च करीषकं ॥ विलोड्य गुटिकां कृत्वा जपसंख्यां तु कारयेत् ॥ वीरतंत्रे ॥ नियमः पुरुषस्येयोषि
त्सु कथं चन न्यासो योषितां चात्र न ध्यानं न च पूजनं जपं केवलजपमात्रेण मंत्राः सिध्यन्ति योषितां यदि पूजाद्यशक्तः स्यात्

द्रव्याभावेन सुंदरि केवलं जपमात्रेण पुरश्चर्या विधीयते ॥ जपनिष्ठा द्वादशैता धर्माः स्युर्मंत्रसिद्धये स्त्रीशूद्रपतितव्रात्यना
स्तिकोच्छिष्टभाषणं अनृतभाषणं जिह्मभाषणं परिवर्जयेत् ॥ सत्येनापि न भाषेत जपहोमादिकर्म्मसु अन्यथानुष्ठितं
सर्वं भवत्येव निरर्थकं योगिनीहृदये ॥ शयीत कुशशय्यायां शुचिवस्त्रावधः सदा प्रत्यहं क्षालनं यत्र शय्यामेकाकी निर्भ
यः स्वपेत् असत्यभाषणं वाचां कुटिलां परिवर्जयेत् ॥ वर्जयेद्गीतवाद्यादिश्रवणं नृत्यदर्शनं अभ्यंगं गात्रलेपं च पुष्प
धारणमेव च ॥ त्यजेदुष्णोदकस्नानं अन्यदेवप्रपूजनं ॥ तत्रैव ॥ नैकवासा जपेन्मंत्रं बहुवासाकुलोपि वा वैशम्पायनसं
हितायां विपर्य्यासं न कुर्य्याच्च कदाचिदपि मोहतः उपर्य्यधो वहिर्वस्त्रं पुरश्चरणकृद्बुधः विनियोगविधानेन तु भवेद्दनियमः
क्वचित् ॥ पतितानामन्त्यजानां दर्शने भाषणे श्रुते क्षुतेऽधोवायुगमने जृंभने जपमुत्सृजेत् ॥ तथा चम्य च तत्र प्राणा
यामं षडंगकं कृत्वा सम्यक् जपेच्छेषं यद्वा सूर्य्यादिदर्शनं ॥ आदिशब्दाद्वह्निब्राह्मणानां च दर्शनं ॥ तंत्रांतरे ॥ मनः संहरणं शौ रम
चं मौनं मंत्रार्थचिंतनं अव्यग्रत्वमनिर्वेदो जपसंपत्तिहेतवः उष्णीषी कंचुकी नग्नो मुक्तकेशो गयावृतः अपवित्रकरोऽशु २६

अशुद्धो न जपेत् क्वचित् अनासनः शयानो वा गच्छन् भुंजान एव वा अप्रावृतौ करौ कृत्वा शिरसि प्रावृतोऽपि वा चिंताव्याकु
लचित्तो वा क्रुद्धो भ्रांतः क्षुधान्वितः रथ्यायामशिवस्थाने न जपेत्तिमिरांतरे उपानद्गूढपादो वा यानशय्यागतस्तथा प्रसार्य
न जपेत् पादावुत्कटासन एव च मार्जारं कुक्कुटं क्रौंचं श्वानं शूद्रं कपिं खरं दृष्ट्वाचम्य चरेत्कर्म स्पृष्ट्वा स्नानं विधीयते
सर्वत्र जपेऽयं नियमः नतु मानसे तथा च शुचिर्वाप्यशुचिर्वापि गच्छंस्तिष्ठन्स्वपन्नपि मंत्रैकशरणो विद्वान्मनसैव सदा
भ्यसेत् ॥ न दोषो मानसे जाप्ये सर्वदेशेपि सर्वदा ॥ जपनिष्ठो द्विजश्रेष्ठोऽखिलयज्ञफलं लभेत् ॥ श्यामादिमंत्रजपे तु तत्तत्
प्रकरणविशेषो वक्तव्यः ॥ जपफलमाह ॥ शिवधर्म्मे ॥ सर्वेषां जपयज्ञानां जायतेऽसौ महाफलः जपेन देवता नित्यं स्तूयमा
ना प्रसीदति प्रसन्ना विपुलान् कामान्दद्यान्मुक्तिं च शाश्वतीं ॥ पाद्मे ॥ यक्षरक्षःपिशाचाश्च ग्रहाः सर्पाश्च भीषणाः जापिनं नो
पसर्पंति भयभीताः समंततः पद्मनारदीययोः ॥ यावंतः कर्म्मयज्ञाः स्युः प्रदिष्टानि तपांसि च ॥ सर्वे ते जपयज्ञस्य कलां नार्हं
ति षोडशीं माहात्म्यं वाचिकस्यैतज्जपयज्ञस्य कीर्तितं तस्माच्छतगुणोपांशुः सहस्रो मानसः स्मृतः तथा तंत्रे ॥ मानसः सि

२ सिद्धिकामानां पुष्टिकामे रुपांशुकः वाचिको मारणे चैव प्रशस्तो जपईरितः ॥ गौतमीये ॥ शक्त्या त्रिसवनं स्नानमन्यथा द्विः
सकृच्च वा त्रिसंध्यं प्रजपेन्मंत्रं पूजनं तत्समं भवेत् ॥ संध्यात्रये पूजांगत्वाज्जपमष्टोत्तरं शतमित्यर्थः ॥ एकदा वा भवेत् पूजा न
जपेत् पूजनं विना जपां नेवा भवेत्पूजा न जपेत् पूजनं विना जपांते वा भवेत्पूजा पूजांते वा जपेन्मनुं प्रातः कालं समारभ्य ज
पेन्मध्यंदिनावधि मध्यंदिनावधीति नियममपरं अन्यथा तत्समयजपनियममेकदा चिच्छिद्या या जाड्येन वा समाप्तिर्द्वि
सप्रतिनियमसंख्याया अपूर्णत्वेऽधिकत्वे वा नियमभंगः स्यात् ॥ मनः संहृत्य विषयात् मंत्रार्थगतमानसः न द्रुतं न विलंबं
च जपेन्मौक्तिकहारवत् ॥ जपः स्यादक्षरावृत्तिर्मानसोपांशुवाचिकैः धिया यदक्षरश्रेणीं वर्णस्वरपदात्मिकां उच्चरेदर्थमुद्दि
श्य मानसः स जपः स्मृतः ॥ जिह्वोष्ठौ चालयेत्किंचिद्देवतागतमानसः ॥ किंचित् श्रवणयोग्यः स्यादुपांशुः स जपः स्मृतः जिह्वा राम
जपः स विमुसः सह्यज्ञेयः केवलं जिह्वया बुधैः मंत्रमुच्चारयेद्वाचा वाचकः स जपः स्मृतः उच्चैर्जपाद्विशिष्टः स्यात् उपांशुर्दशा १०
भिर्गुणैः जिह्वाजपः शतगुणः सहस्रो मानसः स्मृतः तंत्रांतरे ॥ उच्चैर्जपोधमः प्रोक्त उपांशुर्मध्यमः स्मृतः उत्तमो मानसो दे

वि त्रिविधः कथितो जपः अतिह्रस्वो व्याधिहेतुरतिदीर्घो वसुक्षयः अक्षराक्षरसंयुक्तं जपेन्मौक्तिकहारवत् मनसा यत्
स्मरेत्स्तोत्रं वचसा वा मनुं जपेत् ॥ उभयं निष्फलं याति भिन्नभांडोदकं यथा गौतमीये ॥ पशुभावे स्थिता मंत्राः केवला मंत्ररूपि
णः ॥ सौषुम्नाध्वन्युच्चरिताः प्रभुत्वं प्राप्नुवंति ते मंत्रास्वर्णानि चिच्छक्तेः प्रोत्थानि परिभावयेत् ॥ तामेव परव्योम्नि परमामृतबृंहिते
दर्शयत्यात्मसद्भावं पूजाहोमादिभिर्विना कुलार्णवे मनोन्यत्र शिवोन्यत्र शक्तिरन्यत्र मारुतः ॥ न सिध्यंति वरारोहे कल्पको
टिशतादपि जातसूतकमादौ स्यादंते च मृतसूतकं ॥ सूतकद्वयसंयुक्तो यो मंत्रः स न सिध्यति ॥ गुरोर्लब्ध्वाहितं कृत्वा मंत्रं या
जपेद्धिया सूतकद्वयसंयुक्तः स मंत्रः सर्वसिद्धिदः ब्रह्मबीजं मनोर्दत्वा चाद्यंते परमेश्वरि सप्तवारं जपेन्मंत्रं सूतकद्वयमुक्त
ये मंत्रार्थं मंत्रचैतन्यं योनिमुद्रां न वेत्ति यः शतकोटिजपेनापि तस्य सिद्धिर्न जायते नु भवीजाश्च ये मंत्रा न दास्यंति फलं प्रि
ये मंत्राश्चैतन्यसहिताः सर्वसिद्धिकराः स्मृताः ॥ चैतन्यरहिता मंत्राः प्रोक्ता वर्णास्तु केवलं ॥ फलं नैव प्रयच्छंति लक्षकोटिश
तैरपि ॥ मंत्रोच्चारे कृते याद्दक्स्वरूपं प्रथमं भवेत् ॥ शते सहस्रे लक्षे वा कोटिजापेन तत्फलं ॥ हृदये ग्रंथिभेदश्च सर्वावयववर्द्धनं ॥

९ आनंदाश्रुणिपुलको देहावेशः कुलेश्वरि गद्गदोक्तिश्च सहसा जायते नात्र संशयः सकृदुच्चरितेप्येवं मंत्रे चैतन्यसंपुटे॥ नेदृश्यंते प्र
त्ययायत्रपारंपर्य्यंलुप्यते मासमात्रंजपेन्मंत्रंभूतलिप्यातुसंपुटं॥ क्रमोत्क्रमात्सहस्रंतुततःसिद्धोभवेन्मनुः अथभूतलिपिः स्य २
पंचह्रस्वाः संधिवर्णा व्योमेराग्निजलंधरा अंत्यमाद्यंद्वितीयंचचतुर्थंमध्यमंक्रमात् पंचवर्गाक्षराणास्युर्वं त्रोष्ठेनतुभिः सहए
भूतलिपिः प्रोक्ताद्विचत्वारिंशदक्षरैः॥ गौतमीये॥ एवंजपंपुराकृत्वातेजोरूपंसमर्पयेत्॥ देवस्यदक्षिणेहस्तेकुशपुष्पाद्य॰
वारिभिः सफलंतद्विभाव्यैवंप्राणायामंसमाचरेत्॥ जपस्यादौजपांतेचत्रितयंत्रितयंचरेत्॥ शक्तिविषयेवामहस्तेतथाच॥
एवंजपंपुराकृत्वागंधाक्षतकुशादिकैः जपंसमर्पयेद्देव्यावामहस्तेविचक्षणः जपांतेप्रत्यहंमंत्रीहोमयेत्तद्दशांशतः तर्पणं॰
चाभिषेकंचतत्तद्दशांशेनानुमुन प्रत्यहंभोजयेद्विप्रानन्यूनाधिकप्रशांतये अथवासर्वसंपूर्णोहोमादिकमथाचरेत्॥ यस्यया
वान्जपः प्रोक्तस्तद्दशांशमनुक्रमात्॥ तत्तद्द्रव्येजपांतेचहोमंकुर्याद्दिनेदिने॥ पुरश्चरणचंद्रिकायां॥ ततोजपदशांशेनहोमंकु
र्याद्दिनेदिने॥ तथाहोमाद्यशक्तौसनत्कुमारीये यद्यदंगंभवेद्भंगंतत्संख्याद्विगुणोजपः होमाभावेजपःकार्य्योहोमसंख्या

चतुर्गुणः विप्राणांक्षत्रियाणांचरससंख्यागुणः स्मृतः॥ वैश्यानांवसुसंख्याकमेषांस्त्रीणांविधिः स्मृतः यंवर्णमाश्रितः शूद्रः स
तस्यैवजपंचरेत्॥ तत्राप्यशक्तश्चेत् योगिनीहृदये होमकर्मण्यशक्तानांविप्राणांद्विगुणोजपः इतरेषांतुवर्णानांत्रिगुणादिः
समीरितः तदुक्तंकुलप्रकाशे॥ यद्यदंगविहीनः स्यात्तत्संद्विगुणोजपः कुर्वीतद्विचतुष्कंचययासंख्यंद्विजातयः एतेनस्त्री
शूद्राणांहोमाधिकारः तथाशूद्राणांअस्त्रमितिकुंडप्रकारणेशारदायां स्त्रीणांहोमाधिकारस्तत्र लाजैस्त्रिमधुरोपेतैर्होमः
कन्यांप्रयच्छति अनेनविधिनाकन्यावरमाप्नोतिवांछितं एतच्चब्राह्मणद्वारा तथाचतंत्रे॥ ॐकारोच्चारणाद्धोमात्शाल
ग्रामशिलार्चनात् ब्राह्मणीगमनाच्चैवशूद्रश्चांडालतांव्रजेत् इतिशूद्रस्यसाक्षाद्धोमनिषेधात्॥ स्त्रीयामपिसर्ववै
वैदिककर्मसुशूद्रतुल्यत्वप्रतिपादनात्॥ स्त्रीशूद्रकरसंस्पर्शोवज्रपातोममोपरि॥ इतिभगवद्वचनात्॥ तथानारायणक
ल्पे॥ अष्टाक्षरोमहामंत्रः सप्तार्णः शूद्रयोषितोः॥ प्रणवादिश्चयोमंत्रोनस्त्रीशूद्रप्रशस्यते॥ इतिसर्वत्रस्त्रीणांशूद्रवद्व्यव
हारः॥ सर्वेषांवाद्विगुणोजपः तथाचतंत्रांतरे॥ यद्यदंगंविहीयेततत्संख्याद्विगुणोजपः कर्तव्यश्चांगसिध्यर्थंतदशक्तेनभक्तितः॥

१९ नवेदंगंविहीयेननहिशिष्टमवाप्नुयात् तथाचागस्त्यसंहितायां॥ यदिहोमेनशक्तः स्यात्पूजायांनर्पणेपिवा तावत्संख्यजपेनैवब्राह्मणाराधनेनच भवेदंगद्वयेनैवपुरश्चरणमार्य्यवै॥ ततश्च॥ गुरवेदक्षिणांदद्याद्भोजनाछादनादिभिः गुरुसंतोषमात्रेण मंत्रसिद्धिर्भवेध्रुवं सम्यक्कुसिध्यकंमंत्रस्यपंचांगोपासनेनच सर्वेमंत्राः प्रसिध्यंतित्वत्प्रसादात्कुलेश्वरि॥ गुरुमूलमिदंसर्वमित्याहुस्तत्ववेदिभिः एकग्रामस्थितोनित्यंगत्वावंदेतवैगुरुं॥ गुरुरेवपरंब्रह्मतस्मादादौनमश्चरेत्॥ मिष्टान्नंवहुसत्कार्य्यंभुंजीतवंधुभिःसहः एवंसिद्धमनुर्मंत्रीसाधयेत्सकलेप्सितान्॥ अथवान्यप्रकारेणपुरश्चरमिष्यते॥ ग्रहणेचंद्रसूर्येचशुचिपूर्वमुपोषितः नद्यांसमुद्रगामिन्यांनाभिमात्रोदकेस्थितः॥ स्पर्शादिमुक्तिपर्य्यंतंजपेन्मंत्रंमनुन्मधीः॥ नद्याभावेतु॥ महापुण्योदकेस्नात्वाशुचिःपूर्वमुपोषितः ग्रहणादिविमोक्षांतंजपेन्मंत्रंसमाहितः उपवासोभावेतु॥ अथ राम
वान्यप्रकारेण पौरश्चारणिकोविधिः चंद्रसूर्य्योपरागेचस्नात्वाप्रयतमानसः स्पर्शादिमुक्तिपर्य्यंतंजपेन्मंत्रंसमाहितं॥ दृष्ट्वास्नात्वासमंकल्प्याविमोक्षांतंजपंचरेत् तावज्जपादिकंकुर्याद्ग्रहणांतेशुचिःपुमान्॥ इतिजपान्मंत्रसिद्धिर्भवत्येवनसंशयः श्राद्धा १९

देरनुरोधेनयदिजाप्यंत्यजेन्नरः सभवेद्देवताद्रोहीपितॄन्सप्तनयत्यधः इतिसनत्कुमारीयवचनात्॥ ग्रहणेजपस्यावश्यकत्वमितिकेचित् ग्रहणेजपस्यावश्यकत्वेतस्तु आधपुरश्चरणविषयमिदं॥ तथाचारब्धपुरश्चरणेणयदिग्रहणेयदिग्रहणंभवे
३ व त्तदाश्राद्धाद्यनुरोधेनजपंनैवत्यजेत् एवंराचावपिपुरश्चरणविशेषोवोद्धव्यमितिसर्वंसमंजसं योगिनीतंत्रे॥ कल्पोक्तविधिना मंत्रीकुर्याद्धोमंसमाहितः अथवातद्दशांशेनहोमादींश्चसमाचरेत्॥ तथा॥ अनंतरंदशांशेनक्रमाद्धोमादिकंचरेत्॥ तदंतेमहतींपूजांकुर्य्याद्ब्राह्मणभोजनं ततोमंत्रप्रसिध्यर्थंगुरुंसंपूज्यतोषयेत्॥ एवंचमंत्रसिद्धिःस्याद्देवताचप्रसीदति॥ यद्यपिपुरश्चरणपदंपंचांगपरं तथाचजपहोमतर्पणंचअभिषेकोब्राह्मणभोजनं॥ पंचांगोपासनंलोकेपुरश्चरणमुच्यते॥ तथापिग्रहणादौपुरश्चरपदंगौणंजपमात्रपरं सूर्य्योदयंसमारभ्ययावत्सूर्योदयावधि॥ इत्यादौतथादर्शनात्॥ तत्रहोमदेवरभावात् तर्हिकथंग्रहणपुरश्चरेहोमादिरितिचेद्वचनादेवजायते नचपुरश्चरणस्यपंचांगत्वात्सर्वत्रतदेवस्यादितिवाच्यं ग्रहणेपुनस्तद्विधानमनर्थकंस्यात् किंचग्रहणेहोमादिनियमान्नान्यत्रहोमादि ग्रहणपुरश्चरणेहोमादि

२० विधानंतुप्रकृतीभूतपंचांगपुरश्चरणतुल्यताविधानायश्चातएवग्रहणेपंचांगस्वरूपपुरश्चरणेऽन्नेमुख्यप्रयोगेप्यधिकारइ
तिप्रकटीकर्तुं तदकरणेपुनःकेवलजपमात्रपुरश्चरणेतत्रनाधिकार इतिसर्वसमंजसमिति पुरश्चरणस्यकालश्चवारा
हीये चंद्रताराद्यनुकूले चशुक्लपक्षेशुभेहनि आरभेत्पुरश्चर्य्यांहरौसुप्तेनचाचरेत गृहयेचमहातीर्थेनकालमवधारय
त॥प्रतिप्रसवस्त्वत्ररुद्रयामले॥कार्त्तिकाश्विनवैशाखमाघेषुमार्गशीर्षकेफाल्गुनेश्रावणेदीक्षापुरश्चर्य्याप्रसस्यते॥
अथपुरश्चरणप्रयोगः॥तत्रतावद्भूमेःपरिग्रहंकृत्वापुरश्चरणप्राक्तृतीयदिवसेक्षौरादिकंविधायशुद्धवेदिकायाश्चतुर्दिक्षु
क्रोशंक्रोशद्वयंवाक्षेत्रंचतुरस्रंआहारादिविहारार्थंपरिकल्प्यतत्रैवकुम्भचक्रानुगुणंमंडपंविधायएकभक्तंचकुर्य्यात
ततपूर्वदिनेस्नानादिकंविधायशुद्धः सन्चतुर्दिक्षु अश्वत्थोदुंबरप्लक्षाणामन्यतमस्यवितस्तिमात्रान्कीलकान्॥ॐनमः राम
सुदर्शनायास्त्रायफडितिमंत्रेणाष्टोत्तरशताभिमंत्रितान् ॐयचात्रविघ्नकर्त्तारोदिविभूम्यंतरीक्षगाः विघ्नभूताश्चयेचान्ये २०
ममर्मत्रस्यसिद्धिषु मयैतत्कीलितंक्षेत्रंपरित्यज्यविदूरतः अपसर्पंतुतेसर्वेनिर्विघ्नंसिद्धिरस्तुमे इत्यनेननिखन्यते

षु ॐसुदर्शनायास्त्रायफडितिमंत्रेणास्त्रंसंपूज्य पूर्वादिक्रमेणा इंद्रादिलोकपालान् ॐभूर्भुवःस्वरिन्द्रादिलोकपालाइहा
गच्छतइत्यावाह्यपंचोपचारैःपूजयेत्॥तथाच॥शून्यक्षेत्रादिकंगत्वाकुर्य्यात्भूमिपरिग्रहं तथाह्यमुकमंत्रस्यपुरश्चरण
सिद्धये मयेयंगृह्यतेभूमिर्मंत्रोयंसिध्यतामिति तथाच॥नगरादावपिक्रोशंक्रोशयुग्ममथापिवा आहारादिविहा
रार्थंतावतींभूमिमाक्रमेत्॥क्षीरीरक्षोभवान्कीलान्अस्त्रमंत्रमंत्राभिमंत्रितान्॥निखनेद्दशदिग्भागेतेष्वस्त्रंचप्रपू
जयेत्॥तदुक्तं॥क्षेत्रपालादिकंतत्रपूजयेद्विधिवत्ततः क्षेत्रेशंवास्तुनामानंविघ्नराजंसमर्चयेत्॥लोकपालान्पुनस्तेषु
गंधाद्यैःपूजयेत्सुधीः ततोमध्यस्थानेक्षेत्रपालंवास्त्वीशंचसंपूज्यसर्वविघ्नविनाशार्थंगणेशंपूजयेत्+दिक्पतिभ्योबलिं
दद्यात् ततःक्षेत्रंसमाविशेत्॥ततोभक्तादिनापूजितदेवताभ्योबलिंदद्यात्॥येरौद्रारौद्रकर्म्माणोरौद्रस्थाननिवासिनः
मातरोरौद्ररूपाश्च गणाधिपतयश्चये॥विघ्नभूताश्चयेचान्येदिग्विदिक्षुसमन्विताः सर्वेतेप्रीतिमनसःप्रतिगृह्णन्त्विमंबलिं
इत्यनेनाष्टदिक्षुबलिंदद्यात् तथा प्रातःस्नात्वातुगायत्र्याःसहस्रंप्रयतोजपेत् ज्ञानाज्ञानस्यपापस्यक्षयार्थंप्रथमंततः

इति विद्याधराचार्यः ॥ यत्तु प्रातः स्नात्वा तु सावित्र्याः अयुतं प्रयतो जपेत् ॥ इति तत्पुनरस्तं तत्पापशंकया ॐ अद्येत्यादि अमु
२१ कगोत्रोऽमुकदेवशर्माऽहं ज्ञाताज्ञातपापक्षयकामोऽष्टोत्तरसहस्रसावित्रीजपमहं करिष्ये इति संकल्प्य जपेत् ॥ ततउपवा
सं हविष्यं वा कुर्यात् ॥ ततः परदिने उषसि स्नानादिकं कृत्वा स्वस्तिवाचनपूर्वकं संकल्पं कुर्यात् ॥ ॐ अद्येत्यादि अमुकगो
त्रोऽमुकदेवशर्मा अमुकदेवताया अमुकमंत्रसिद्धिप्रतिबंधकाशेषदुरितक्षयपूर्वकतत्तन्मंत्रसिद्धिकामोऽद्यारभ्य यावता
कालेन सेत्स्यति तावत्कालममुकमंत्रस्य यत्संख्यजपतद्दशांशहोमतद्दशांशतर्पणतद्दशांशाभिषेकतद्दशांशब्राह्मणभो
जनरूपपुरश्चरणमहं करिष्ये ॥ इति संकल्प्य सामान्यपूजां विधाय दीपज्वलनं देवतां हृदये कृत्वा प्रातः कालमारभ्य म
ध्यदिनं यावत् जपं कुर्यात् ॥ ततो होमस्ततस्तर्पणं कुलार्णवे ॥ सनत्कुमारीये ॥ प्रणवं तत्सदद्येति मासपक्षतिथावपि अ राम
मुकामुकगोत्रोऽहं मूलमुच्चार्य तत्परम् । सिद्धिकामोऽस्य मंत्रस्य इयत्संख्यजपस्ततः दशांशहवनं होमात् दशांशं तर्पणं ततः २१
तद्दशांशं मार्जनं स्यात् दशांशं विप्रभोजनं ॥ पुरश्चरणमेवं हि करिष्ये ॥ प्रांमुखं ततः तत्तज्जपदशांशहोमस्तद्दशांशतर्पणं तद्द

शांशब्राह्मणभोजनं तर्पणं तु ततः कुर्यात् तीर्थोदैश्चन्द्रमिश्रितैः जुलेदेवं समावाह्य पाद्याद्यैरुदकात्मकैः संपूज्य विधिव
त्या परिवारसन्वितं एकैकमंजलिं तोयं परिवारान् प्रतर्पयेत् ततो मा होरदशांशेन तर्पयेत् परदेवतां तर्पणमंत्रस्तु स्नान
प्रकरणे वक्तव्यः अभिषेकवाक्यं तु ॥ नमोन्तं मूलमुच्चार्य अमुकदेवतामहमभिषिंचामि इति कलसमुद्रया स्वमूर्ध्नि अभि
षिंचेत् ॥ तथा च पुरश्चरणचंद्रिकायां नमोन्तं मूलमुच्चार्य्य तदंते देवताभिधां द्वितीयांतामहं पश्चात् अभिषिंचाम्यनेन तु
अभिषिंचेत्स्वमूर्धानं तोयैः कुंभाख्यमुद्रया शक्तिविषये नीलतंत्रे ॥ मंत्रांते नाममुच्चार्य्य सिंचयामि नमः पदमिति ततो
दक्षिणा ॐ तत्सदद्य कृतैतदमुकदेवताया अमुकमंत्रस्य पुरश्चरणकर्मणः सांगतार्थं दक्षिणामिदं कांचनं यथानाम
गोत्राय गुरवे तुभ्यमहं संप्रददे ततोऽक्षिद्राव धारणं कुर्यात् अथ ग्रहणपुरश्चरणसंकल्पः ॥ ॥ ॐ अद्येत्यादि अमुकगो
त्रः श्री अमुकदेवशर्म्मा राहुग्रस्ते निशाकरे वा अमुकदेवताया अमुकमंत्रसिद्धिकामो यासादिमुक्तिपर्य्यंतं जपरूपपुरश्चर
णमहं करिष्ये ॥ इति संकल्प्य जपेत् ॥ तद्दिने तत्पूर्वदिने वा स्नानादिकं विधाय ॐ अद्येत्यादि कृतेतत् ग्रहणकालीनामुकमंत्र

स्यय संख्यजपतद्दशांशहोमतद्दशांशतर्पणतद्दशांशमभिषेकतद्दशांशब्राह्मणभोजनकर्म्माण्यहं करिष्ये इति संकल्प्य।
२२ होमादिकं कुर्य्यात्॥ दक्षिणादिकं च पूर्ववत्॥ अथ कूर्म्मचक्रं॥ दीपस्थानं समाश्रित्य सहृतं कर्म्म फलप्रदं॥ चतुरस्रां भुवं भि
त्वा कोष्ठानां नवकं लिखेत्॥ पूर्वादि विलिखेत्तत्र सप्तवर्गाननुक्रमात्॥ तत्समीशे मध्यके ऽष्टस्वरान्युग्मान्क्रमाल्लिखेत्॥
दिक्षु पूर्वादितो यत्र क्षेत्राद्यक्षरसंस्थितिः मुखं तस्य विजानीयाद्धस्तावुभयतः स्मृतौ कोष्ठकुक्षी उभे पादौ द्वे शिष्टं पुच्छमी
रितं क्रमेणानेन विभजेन्मध्यस्थमपि भागतं॥ मुखस्थो लभते सिद्धिं करस्थः स्वल्पजीवनः उदासीनः कुक्षिसंस्थः पादस्थो
दुःखमाप्नुयात् पुच्छस्थः पीड्यते मंत्री बंधनोच्चाटनादिभिः॥ कूर्मचक्रमिदं प्रोक्तं मंत्राणां सिद्धिसाधनं कूर्म्मचक्रमविज्ञा
य यः कुर्य्याज्जपयज्ञकं॥ तस्य यज्ञफलं नास्ति सर्वानर्थाय कल्पते॥ अथ मंत्राणां दश संस्काराः तत्रे गौतमीये॥ जननं राम
जीवनं पश्चात्ताडनं बोधनं तथा॥ अभिषेकोथ विमलीकरणाप्यायने पुनः॥ तर्पणं दीपनं गुप्तिर्दशैता मंत्रसंस्क्रियाः २२
स्वर्णादिपात्रे संलिख्य मातृकायंत्रमुत्तमं काश्मीरचंदनेनाथ भस्मनावाथ सुव्रत काश्मीरं शक्तिसंस्कारे चंदनं वैष्णवे

भायारमा

मंत्रे गोमलं आलयं तत्पं प्रोक्तं निषिद्धं तन्मलत्रयं तारयामोरमामोगेइति तारमायारमाबीजपुटितं मंत्रमष्टोत्तरशतं
जपेदित्यर्थः तथा च विश्वसारे तारमायारमाबीजपुटितेन जपेन्मनुं॥ शतमष्टोत्तरं चैव दीपयेत्साधको त्तमः॥ अथ
कलावतीदीक्षाप्रयोगः॥ तत्र शिष्यः पूर्वमुपोषितः कृतनित्यक्रियः स्वस्तिवाचनपूर्वकं संकल्पं कुर्यात्॥ तद्यथा॥ ॐ अद्ये
त्यादि अमुकगोत्रः श्रीअमुकदेवशर्माधर्मार्थकाममोक्षकामोऽमुकदेवतायाअमुकमंत्रदीक्षामहं करिष्ये॥ इति संकल्प्य गु ४
रुं वृणुयात् तद्यथा॥ ॐ साधु भवानास्तांइति शिष्यो वदेत् ॐ साध्वहमासे इति गुरुर्वदेत्॥ ॐ अर्चयिष्यामो भवंतं ॐ
अर्चय ततो गंधपुष्पवस्त्रालंकारादिभिरभ्यर्च्य दक्षिणाजानुं धृत्वा पठेत् ॐ अद्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्म्माऽ
मुकदेवतायामत्र कर्तव्यामुकमंत्रदीक्षाकर्म्मणि अमुकगोत्रं अमुकदेवशर्माणामेभिर्गंधादिभिरभ्यर्च्य गुरुत्वेन भवंतमहं वृ
णे॥ ॐ वृतोस्मीति प्रतिवचनं॥ यथाविहितं गुरुकर्म्म कुरु॥ यथाज्ञानतः करवाणीति प्रतिवचनं॥ ततो गुरुराचम्य द्वारदेशे सामा राम
न्यार्घ्यं कुर्य्यात्॥ तद्यथा॥ वामे त्रिकोणमंडलं रक्तभूविंबं विधाय आधारशक्तये नमः॥ इति संपूज्य फडिति मंत्रेण पात्रं प्र २३

उसमितिबीजे

मनोशैवेभस्मसमाख्यानंमातृकार्यंत्रलेखने॥ मंत्राणांमातृकामध्यादुद्धारोजननंस्मृतं पंक्तिक्रमेणविधिनामुनिभिस्तत्र
निश्चितं १ प्रणवांतरितान्कृत्वामंत्रवर्णान्जपेत्सुधीः प्रत्येकंशतवारंतुजीवनंतदुदाहृतं॥२॥ मंत्रवर्णान्समालिख्यता
डयेच्चंदनांभसा चंदनेवायुबीजेनप्रत्येकंतु ताडनंमतं ३ विलिख्यमंत्रवर्णांश्च प्रसूनैः करवीरजैः तन्मंत्रवर्णसंख्याकैर्हन्या
द्रेफेणबोधनं॥४॥ तन्त्रेमंत्रोक्तविधिनाऽभिषेकः प्रकीर्तितः अश्वत्थपल्लवैः सिंचेन्मंत्रीमंत्राणुसंख्यया ५ संचिंत्यमनसा
मंत्रंसुषुम्णामूलमध्यतः ज्योतिर्मंत्रेणविधिवद्दहेन्मलत्रयंयतो तारंव्योमाग्निमनुयुग्दंडीज्योतिर्मनुर्मनुर्मतः मनुरोंकारः हं
अनुस्वारः अग्नीरेफः ६ स्वर्णेनकुशतोयेनपुष्पतोयेनवापुनः तेनमंत्रेणविधिवदाप्यायनविधिः स्मृतः ७ मंत्रेणवारिणा
मंत्रेतर्पणंतर्पणंमतं मधुनाशक्तितंत्रेषुवेसवचेतुमज्जलेः शैवेवृतेनदुग्धेनतर्पणंसम्यगीरितं अभिषेकापितथा ना
रमापारमायोगोमनोर्दीपनमुच्यते ९ जप्यमानस्यमंत्रस्यगोपनंत्वप्रकाशनं संस्कारादशसंप्रोक्ताः सर्वतंत्रेषुगोपिताः १०
यान्कृत्वासंप्रदायेनमंत्रीवांछितमाप्नुयात् मलत्रयमितिआनव्यंमायिकंकार्म्मणीच मायिकंनामयोपाधत्यंपौरुषंका॥

क्षाल्यसाधारंतत्रनिधायनमइतिमंत्रेणजलेनसंपूर्य अंकुशमुद्रया ॐगंगेचयमुनेचैवइत्यादिनासूर्यमंडलात्तीर्थमावा
ह्य अमितिगंधादीन्त्रिः क्षिप्यधेनुमुद्रांप्रदर्श्यप्रणवेनाष्टधादशधावाऽभिमंत्रयेत्॥ तथाच॥ त्रिकोणवृत्तभूबिंबमंडलंरचयेत्त
तः आधारशक्तिंसंपूज्यतत्राधारंविनिःक्षिपेत्॥ अस्त्रेणपात्रंसंशोध्य हन्मंत्रेणप्रपूरयेत् निक्षिपेत्तीर्थमावाह्यगंधादीन्प्र
णवेनतु दर्शयेद्धेनुमुद्रांचसामान्यार्घ्यमिदंस्मृतं मंत्रयेत्प्रणवेनैवसामान्यार्घ्यमितिस्मृतमितिगौतमीयात्॥ अथ
प्रधानप्रणवजपः विशेषार्घ्येनथादर्शनात् शंखादौतुदशधातदार्घ्येतथादर्शनात् ततः फडितितज्जलेनद्वारमभ्युक्ष्य
द्वारपूजांकुर्यात्॥ तद्यथा॥ ॐह्रींद्वारेश्वरे॥ ॐविघ्नायनमः॥ एवंमहालक्ष्म्यैनमः ॐसरस्वत्यैनमः दक्षिणशाखायांॐविघ्नाय
नमः वामशाखायां ॐक्षेत्रपालायनमः तयोः॥ पार्श्वद्वयोॐगंगायैनमः॥ ॐयमुनायैनमः देहल्यांॐअस्त्रायनमः इति॥
पुष्पवारिभिः पूजयेत्॥ अशक्तश्चेद्द्वारदेवताभ्योनमः॥ इतितावन्मात्रं॥ त्रिपुरादिपूजनेतु गणेशंक्षेत्रपालंचवटुकंयोगि
नींतथा गंगांचयमुनांचैवलक्ष्मीवाणीततोयजेत् दितिविशेषः वैसवेतु नंदः सुनंदश्चंडश्चप्रचंडोबलएवचप्रबलोभद्रना

मां च स्कंभद्रो विघ्नवैरसवाः प्रणवादिनमोंतेन नाममंत्रेण पूजयेत्॥ ततो दक्षिणपादपुरःसरं वामशाखां प्रशस्य दक्षिणांगं संकोच
यन्मण्डपांतः प्रविश्य नैर्ऋत्यां ॐ वास्तुपुरुषाय नमः ब्रह्मणे नमः॥ ईशानाय नमः॥ इति पूजयेत् ततो देयमंत्रेण दिव्यदृ
ष्ट्यावलोकनाद्दिव्यान् विघ्नानुत्सार्य ॐ अस्त्राय फडिति जलेनांतरीक्षान् विघ्नानुत्सार्य वामपार्ष्णिघातत्रयेण भौमान् विघ्नानु
त्सार्य फडिति सप्तजप्तान् विकिरानादाय ॐ अपसर्पंतु ते भूता ये भूता भुवि संस्थिताः ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञ
या इति विकिरेत् तथा च॥ लाजचंदनसिद्धार्थभस्मदूर्वाकुशाक्षताः विकिरा इति संदिष्टाः सर्वविघ्नौघनाशनाः ततो ह्री
माधारशक्तिकमलासनाय नमः॥ इत्यासनं संपूज्यासनमंत्रस्य ॐ मेरुपृष्ठ ऋषिः सुतलं छंदः कूर्मो देवता आसनपरिग्रह
ध्वि णे विनियोगः ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता त्वं च धारय मां नित्यं पवित्रं कुरु चासनं इति पठित्वा स्वस्तिकादिक्र राम
मेणोपविशेत् तंत्रांतरे॥ आदौ विघ्नं समुत्सार्य पश्चादासनकल्पनं अथवा चासने स्थित्वा विघ्नानुत्सारयेत् सुधीः ततः २४
पंचगव्येन मंडपं विशोधयेत्॥ तथा च गौतमीये॥ पंचगव्येन तद्गेहं मंडपं च विशोधयेत् पंचगव्यमानं तु गौतमीये पल

मात्रं दुग्धभागं गोमूत्रं तावदिष्यते। घृतं च पलमात्रं स्यात् गोमयं तोलकद्वयम्॥ दधिप्रसृतिमात्रं स्यात् पंचगव्यमिदं स्मृतं॥
अथवा पंचगव्यानां समानो भाग इष्यते॥ मूलमंत्रेणाभिमंत्र्य तेनैव परिशोधयेत्॥ तेन सर्वविशुद्धिः स्यात् सर्वपापनिकृंतनं॥
ततः स्वदक्षिणे पूजाद्रव्याणि वामभागे सुवासितांबुपूर्णकुंभं हस्तप्रक्षालनार्थं पात्रांतरं पृष्ठदेशे स्थापयेत् सर्वदिक्षु घृ
तप्रदीपांश्च पुटांजलिर्भूत्वा वामे ॐ गुरुभ्यो नमः ॐ परमगुरुभ्यो नमः ॐ परापरगुरुभ्यो नमः॥ दक्षिणे ॐ गणपतये नमः
मध्ये ॐ अमुकदेवतायै नमः कृतांजलिपुटो भूत्वा वामे गुरुत्रयं यजेत्॥ गुरुं च परमादिं च परापरगुरुं तथा दक्षिणे च गणेशा
प्रानं मूर्द्धि देवं विभावयेत् ततः फडिति मंत्रेण ॐ ह्रौं ह्रः तालत्रयं छोटिकया दशदिग्बंधनं कुर्यात्॥ ततो रश्मितिजलधारया
वह्निप्राकारं चिंतयेत्॥ ततो भूतशुद्धिस्ततो मातृकान्यासस्ततः प्राणायामः ततः पीठन्यासः ततो मंत्रन्यासः ततो मुद्रादर्श
नं ततो मानसपूजा ततो ध्यानं॥ ततोऽर्घ्यस्थापनं तद्यथा॥ स्ववामे त्रिकोणवृत्तमंडलं कृत्वा तत्र त्रिपादिकामारोप्य फडि
ति शंखं प्रक्षाल्य तदुपरि संस्थाप्य नमनेति मंत्रेण गंधपुष्पाक्षतदूर्वादि तत्र निःक्षिप्य विमलजलेन सं लं हं सं यं क्षं वं लं रं यं मं भं

वं फं पं नं धं दं थं तं णं ढं डं ठं टं ञं झं जं छं चं ङं घं गं खं कं अः अं औं ओं ऐं एं ॡं ऌं ॠं ऋं ऊं उं ईं इं आं अः इत्यनेन मूलेन चैव पूर
२५ येत् मं वह्निमंडलाय दशकलात्मने नमः इति त्रिपादिकायां अं सूर्यमंडलाय द्वादशकलात्मने नमः इति शंखे उं सोम
मंडलाय षोडशकलात्मने नमः इति जले संपूज्य ॐ गंगे च यमुने चैव गोदावरी सरस्वति नर्मदे सिंधुकावेरि जलेस्मिन् स
न्निधिं कुरु इत्यनेनांकुशमुद्रया सूर्यमंडलात्तीर्थमावाह्य॥ अमुकि इहावह इह तिष्ठ इह इह तिष्ठ तिस्व हृदयाद्देवतां तत्रावा
ह्य हुमितिऽवगुंठ्य वषडिति गालिनीमुद्रां प्रदर्श्य वौषडिति तज्जलं विक्ष्य पुनरंगमंत्रैः सकलीकृत्य गंधपुष्पाभ्यां तत्र देवतां
संपूज्य तदुपरि मूलमष्टधा जपेत्। तथा च गोतमीये। गंधपुष्पैः समभ्यर्च्य कुंभमारव्यं धामयोजयेत्। अष्टकृत्वो जपे
न्मंत्रं शिखायां गालिनीं न्यसेत्। अत्र कुंभपदमुपलक्षणपरं। ततो धेनुमुद्रां प्रदर्श्य अस्त्रेण संरक्ष्याष्टधा। तस्मा राम
त्किंचिज्जलं प्रोक्षणीपात्रे निक्षिप्य तेनोदकेनात्मानं पूजोपकरणं मूलेन त्रिरभ्युक्ष्य पीठन्यासक्रमेण शरीरे धर्मादी २५
न्पूजयेत्। यथा। दक्षिणस्कंधे। ॐ धर्माय नमः। वामे ॐ ज्ञानाय नमः। वामोरौ ॐ वैराग्याय नमः। दक्षोरौ ॐ ऐश्वर्याय०